173 Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नाम संस्कृतकाव्यसंग्रहोऽस्ति वस्तुतो विविध
ावचित्राणां सन्ध्याभूतः । अस्त्यत्र प्रायेण
वचित्राणां संकलिता । सम्भूय नवशती पद्य-
धवर्णाकृतीनां विविधभावाभरणभूषितानामत्र

सर्वाणीमानि भावगीतानि वाराणस्यां
"जगन्नाथः स्वामी" त्यारभ्य "हरहर शम्भो
ुपसंहारं यावदनेका भावसन्ध्या अत्रावलोक-
। अभिनवपरिधाना भक्तिः, पुरातनपरिधाना
कपरिधाना भक्तिशक्तिसंघर्षाः, मूर्त्तपरिधाना-
अमूर्त्तपरिधानानि च मूर्त्तानि सर्वत्र जनयन्ति
ापि सुदर्शां साम्यवैषम्य सामञ्जस्य दर्शिकां
प्रयाम् ।
क्रमुपयुक्तं छन्द आर्या । छन्दांस्यन्यायपि
भूयांसि । द्वित्रा एव काव्यबन्धा अन्यादृशाः ।
"विद्वद्भिः सेविता सद्भिः" सार्वभौमी ।
।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

MOTILAL BANARSIDASS VARANASI

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सन्ध्या

डॉ० रामकरण शर्मा
भूतपूर्व
निदेशक, राष्ट्रिय संस्कृत संस्थान
संयुक्त शिक्षा सलाहकार, भारत सरकार
कुलपति—कामेश्वर सिंह दरभंगा संस्कृत विश्वविद्यालय
तथा सम्पूर्णानन्द संस्कृत विश्वविद्यालय

नाग प्रकाशक
११ ए/यू. ए., जवाहर नगर, दिल्ली-७

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नाग प्रकाशक

1. 11 A/U. A. जवाहरनगर, दिल्ली-110007
2. 8 A/3 U. A. जवाहरनगर, दिल्ली-110007
3. जलालपुरमाफी (चुनार-मिर्जापुर) उ० प्र०

ISBN : 81-7081-165-1

© डॉ० राम करण शर्मा

प्रथम संस्करण
१९८७
मूल्य ७०.००

नागशरण सिंह, नाग प्रकाशक, जवाहर नगर, दिल्ली-७ द्वारा प्रकाशित
तथा अमर प्रिंटिंग प्रेस, विजय नगर, दिल्ली-७ द्वारा मुद्रित

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

SANDHYA

By
Dr. R. K. SHARMA
Ex
DIRECTOR, RASHTRIYA SANSKRIT SANSTHAN &
JOINT EDUCATIONAL ADVISER, GOVT. OF INDIA
VICE-CHANCELLOR : KAMESHWARA SINGH
DARBHANGA SANSKRIT VISHVAVIDYALAYA &
SAMPURNANAND SANSKRIT VISHVAVIDYABAYA



NAG PUBLISHERS
11.A/U.A. JAWAHAR NAGAR (P. O. BUILDING)
DELH-I110007

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

NAG PUBLISHERS

(i) 11A/ U.A. Jawaha Nagar, Delhi-110007
(ii) 8A/3 U.A. Jawaharnagar, Delhi-110007
(iii) Jalalpur Mafi (Chunar-Mirzapur) U. P.

ISBN 81-7081-165-1

© Author

FIRST EDITION
1987

PRICE RS. 70-00

PRINTED IN INDIA
Published by Nag Sharan Singh for Nag Publishers, 11A 3U.A. Jawaharnagar, Delhi-110007 and printed at Amar printing Press, Vijay Nagar Delhi-9

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

॥ नमोऽस्तु ताभ्यां पितृपादुकाभ्याम् ॥

गोत्रे यस्य वसिष्ठशक्तिमहिते द्वैपायनोऽवातरन्
नेत्रे यस्य नते धरामनमतां स्वातन्त्र्यचिन्ताकुले।
तस्मै राष्ट्रहुतात्मने सुयशसे "कामेश्वरा"यार्पिता
"सन्ध्ये" यं जनकाय, सूर्यशशिनोर्धत्तां सुदर्शां विभाम् ॥

रामकरणः

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ॐ नमः शिवाय

प्राणिमि गीर्वाणगिरा

परमशिवस्य परमानुग्रहमहिम्ना "प्राणिमि गीर्वाणगिरा" कामये चान्तिमश्वासादिमामेव स्थितिम् । तदेवं सदैव स्वयं गायामि गीतानि गीर्वाणवाण्यां सर्वभावेषु । नास्त्यत्र "श्रुताभ्याससहिता प्रतिभा" । नास्त्यत्र किमपि कविकौशलम् । तथापि गायाम्येव गीतानि गीर्वाणवाण्यामस्ववशः । "नवे भाजने लग्नः संस्कार" एवात्रापराध्यति, मन्ये । नाहं वर्त्ते "कवियशः प्रार्थी ।" अत एव "न गमिष्याम्युपहास्यता" मपीति विश्वसिमि ।

गीतानि कानिचित् प्राकाश्यमुपागच्छन्नैषम एव "शिवशुकीये" । अभ्यनन्दन्नपि तानि स्नेहपरवशाः सुरभारतीप्रणयिनः । आदिष्टस्तैर्विशेषेण सम्प्रति स्वाराज्यमलङ्कुर्वाणैः सर्वतन्त्रस्वतन्त्रैर्वाराणसीमानसराजहंसैराचार्यबदरीनाथशुक्लमहोदयैः पुरस्करोमि सुहृदां समक्षं पुनर्गीतानि कानिचन वाराणसेयानि प्रायेण ।

सेयं "सन्ध्या" "जगन्नाथः स्वामी" त्यारभ्य "हर हर शम्भो महादेव" इत्युपसंहरन्ती प्रस्तौति विविधानि भावचित्राणि दिव्यादिव्यानि अत्रास्ति भगवान् विश्वनाथः, अत्रास्ति सौहार्दमय आलापः श्री विश्वनाथश्रीवेङ्कटेश्वरयोः, अत्रास्ति भगवान् जगन्नाथः, अत्रास्ति भगवती कामाख्या, अत्रास्ति हरिहरनाथः, अत्रास्ति गणपतिः, अत्रास्ति विश्वनाथनगर्याः कूपमण्डूकोऽपि कोऽपि । अत्रास्ति चेरापुंजी सर्वं स्वं परार्थं ददती । अत्रास्ति वाराणसेयं ताम्बूलमपि ।

क्वचिदत्रातिशेते महाम्भोधिं हिमालयः, क्वचिच्च महाम्भोधिरतिशेते हिमालयम् । अत्रास्ति कृषकजननी सुरसरित् । अत्र सन्ति राजहंसमधुकरमृगेन्द्रगजेन्द्रा विविधभावाभरणभूषिताः । अत्र सन्ति रसालशालास्तरुवराः । अत्रास्ति शिशोर्विलसितम् । अत्रास्ति दृश्या

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिव्या विभूतिर्दिनकरः। अत्रास्ति "राकाशोभा दर्शमध्ये" निषेव्या। अत्रास्ति कूजितं व्यर्थं, कूजितं सार्थमपि पिकस्य। परस्परं विरुद्धाः परस्पराश्रया वा सदसद्भावा अमूर्त्ता मूर्त्तारूढा वा सर्वत्र समायान्त्येव। विलापप्रलापगीतान्यनेकानि साधारणीकृतान्यत्र वर्त्तन्ते।

इत्येवं प्रस्तूयते "सन्ध्ये"यं विविधदिव्यादिव्यभावचक्रयोः सन्ध्याभूता। भाषाच्छन्दः शैली विषये नाहं स्वयं किमपि विवक्षामि। यद्यत्र किमपि क्वचिद्रोचेत सुधीभ्यः सहृदयेभ्यः, कृतकृत्यमात्मानं मंस्ये। अपलपितानि तु मर्षिष्यन्त एव क्षमासाराः साधव इति दृढं विश्वसिमि।

आयुष्मता श्री सतीशेन महता श्रमेण सर्वमत्रत्यं मुद्रणार्थं सज्जीकृतमिति तमाशीर्भिः संवर्धयामि। नागप्रकाशकप्रमुखः श्रीनागशरणसिंहस्तथैव चामरमुद्रणालयप्रमुखः श्री हीरालालः— इत्युभावपि मूलतः स्वान्तः सुखाय लिखितानामेषां गीतानां प्रकाशनार्थं/मुद्रणार्थं साधुवादमर्हतः।

इति निवेदयते
गीर्वाणवाणीप्रणयिचरणचञ्चरीकः
रामकरण शर्मा

पौष शुक्ल पञ्चमी, २०४४
६३ विज्ञान विहार, दिल्ली-११००९२

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

काव्यसूची

१. जगन्नाथः स्वामी १
२. नववर्षाभिनन्दनम् १
३. अटवी शुष्का २
४. स्वगतं पिकस्य २
५. त्रयोऽपि जीवेम मुदा २
६. उपदिश कदापि न गुरो ३
७. त्यजाभिमानम् ४
८. आततायिनमायान्तम् ४
९. अनुगृहाण सरस्वति ४
१०. करुणा स्वतन्त्रा ५
११. मत्तानां समवाये ५
१२. असूया ५
१३. सद्दुर्जनीयम् ६
१४. साधो किमिहाऽऽसक्तः ६
१५. कान्दिशीकः ६
१६. वायवायाहि ७
१७. सरलानां सरला गतिः ७
१८. नाश्रयसे स्वभावम् ८
१९. स्वार्थः ८
२०. मार्जारं प्रति ८
२१. राजाहं विपिनस्य ९
२२. प्रणमामि शिवम् ९
२३. शिवेन दत्तं शिवं भुङ्क्ष्व १०
२४. अपि मिथ्यैवादर्शाः १०
२५. सीमाऽसीमम् ११
२६. कूजितं व्यर्थम् ११
२७. कूजितं सार्थम् ११
२८. त्यज्यतां पक्षपातः १२
२९. प्रयोगः प्रकृतेः १२
३०. सदाजयी मुदुलः १३

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

३१. मूलं चेन्मातुरङ्के १३
३२. न स्वामी न च दासः १३
३३. दार्शनिकः १४
३४. प्रकृतिमेव भजस्व महोत्सवाम् १४
३५. अर्थः श्रमजलविजितः १५
३६. त्वमसि नाप्यसि १५
३७. नमामि गणपतिम् १६
३८. रथविमानीयम् १६
३९. कामाख्या मे प्रसीदतु १७
४०. वयं नियम्याः १७
४१. हे चन्द्रचूड १८
४२. सुरभारती १८
४३. अनुवर्त्तय कर्माणि १९
४४. प्रशासनम् १९
४५. वरं कूपमण्डूक एवाहमस्मि २०
४६. शून्यगगन एव मही २१
४७. शिव नय तस्मिन् ग्रामे २२
४८. अप्येवम् २२
४९. वकाः समे धन्यधन्याः स्थ २३
५०. गतिर्मे निजा २३
५१. कनकपरीक्षा २४
५२. पिपीलिके २४
५३. त्वं योग्यः २४
५४. कूज कोकिल २५
५५. जय हरिहरनाथ २५
५६. शिशोर्हसितम् २६
५७. जयगङ्गे २६
५८. विश्वं शिवम् २७
५९. हसति धरित्री २७
६०. मनश्चित्रम् २८
६१. धर्मरथः २८
६२. वन्दिन सन्तः २९

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

६३. जटिलता २९
६४. (अ) परिग्रहः ३०
६५. अम्भोनिधिः ३०
६६. विनयजयः ३०
६७. शुभाशुभपरित्यागी ३१
६८. मनः संघर्षः ३१
६९. अस्ति भाति ३२
७०. कनकविषम् ३२
७१. 'देवराहा बाबा' ३३
७२. कनकामृतम् ३३
७३. प्रार्थना ३४
७४. उभयोरभ्यासः ३४
७५. हिमालयः ३५
७६. मा कुरु गर्वम् ३५
७७. अग्निर्म्लानः ३६
७८. गृहपतिः शालीनः ३६
७९. कालमहेश्वरः ३६
८०. भद्रमेव जयते ३७
८१. वीणावादिनि ३७
८२. रत्नाकरः ३८
८३. सन्धिर्व्यर्थः ३९
८४. विलपति कुलपति ३९
८५. जाने त्वाम् ३९
८६. यत्र चिकित्स्यतां चिकित्सको भजति ४०
८७. यदपि विधास्यसि शिवं तत्ते ४०
८८. क्षितिरेषाऽरण्यानी ४१
८९. आत्मानमेव शोधय ४१
९०. क्व को यायात् ४१
९१. पर्णकुटी सत्यस्य ४२
९२. न सत्तन्नासदुच्यते ४२
९३. मनसि कृपामाधत्स्व ४३
९४. प्रपञ्चः ४३

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

९५. बहिर्गच्छसि गच्छैव ४४
९६. जयति शिशुरयम् ४४
९७. स्वपिहि रामकथे ४५
९८. कामाख्या ४५
९९. सा यद् वाञ्छति तत्तदेव ४६
१००. नास्थां कदापि जहि ४६
१०१. मनोरथौ ४६
१०२. धूर्त्ताः ४७
१०३. बालविलसितम् ४७
१०४. विधिं ययाचे हरिर्हंसम् ४७
१०५. मानव जिह्वा न ते गलति ४८
१०६. प्रतिनिशं कवयामि ४८
१०७. वीक्षै भद्रमभद्रे ४८
१०८. प्रकृतिनटी ४९
१०९. आध्यात्मं को निषेवेत ४९
११०. कुञ्चिका रथगतेः ४९
१११. नायं मालाकारः ५०
११२. आसुरा विग्रहाः ५०
११३. पथिकं प्रति ५०
११४. वन्देऽधवलचरित्रान् ५१
११५. नेर्ष्यति कुमुदम् ५१
११६. तच्चरणौ शरणं व्रज ५१
११७. पारेविश्वमदृश्यः स्नेहः ५२
११८. असन्तोषः ५२
११९. लज्जा कुतः ५२
१२०. पुण्यं वद ५३
१२१. पठ समरसतां योगिन् ५३
१२२. किंशुकं प्रति ५४
१२३. पवन सदागतिरोधि ५४
१२४. परिणयः ५४
१२५. काऽसौ प्रयोगशाला ५४
१२६. अहमेव महान् ५५

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

१२७. कनिष्क हा हन्त गतः कुतः क्षणात् ५६
१२८. यत्र न करुणा ५६
१२९. शैवी शक्तिः ५७
१३०. जागृहि कविते ५७
१३१. परमशिवः ९५
१३२. अनुवर्त्तनम् ५९
१३३. दौर्जन्यनिदानम् ६०
१३४. अचूचुरन्नव्यनवनीतम् ६०
१३५. शुभाशंसनम् ६१
१३६. शिव एव ६१
१३७. हालिकं वन्दे ६२
१३८. वैलक्षण्यम् ६३
१३९. अनुकम्पा भागवती ६३
१४०. खण्डा अपि पूज्यास्ते ६४
१४१. प्राणिमि गीर्वाणगिरा ६४
१४२. ताम्बूलमहिमा ६४
१४३. न त्वं त्यक्ष्यसि ६५
१४४. शुष्को मनुजलोकः ६५
१४५. को जानाति ६५
१४६. शिवोऽहम् ६६
१४७. महा "सोप" म् ६६
१४८. शिवशुकः ६७
१४९. पलायस्व ६७
१५०. चालय धर्मरथं स्वम् ६८
१५१. स्वेदाम्बुभिः तर्पणम् ६८
१५२. नगराज ६८
१५३. क्षुरस्य धारा ६९
१५४. क्वासौ साकेतः ६९
१५५. कर्ण वदान्यश्रेष्ठ ६९
१५६. करुणामेव दुर्हसि ६९
१५७. धाम शाश्वतम् ७०
१५८. धन्यस्त्वं हे नारद ७०

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

१५९. सूपायनो भव ७१
१६०. स्मर स्मरारिम ७१
१६१. त्रिविधं स्वरूपं ७२
१६२. क्व गता महर्षयस्ते ७२
१६३. किं कुर्वीत मनस्वी ७२
१६४. शूलिन् नमो नमस्ते ७३
१६५. महानायकः ७३
१६६. अप्रतिग्रहीता ७३
१६७. ददासि यत्तदेव ते ७४
१६८. रे रे वायस ७४
१६९. स्वामी चेन्मम भगवान् ७४
१७०. किमपि न कुर्वे वहाम्येव ७५
१७१. महात्मा विषं वमति ७५
१७२. लाभः ७६
१७३. "मुण्डे मुण्डे" ब्रह्माण्डम् ७६
१७४. ज्ञायतां शैली ७६
१७५. आसुरी माया ७७
१७६. पुच्छं प्रचालयसि ७७
१७७. निर्घातसमीरणा ७७
१७८. राज्ञः काऽऽवश्यकता ७८
१७९. गुणप्रकाशनम् ७९
१८०. मराल कीदृङ् मोहः ७९
१८१. विवेकदृक् ७९
१८२. वपसि गरलबीजम् ८०
१८३. आकाशोऽहं विशालः ८०
१८४. परमस्ववशा प्रकृतिरेव ८०
१८५. समं समेषां प्रियं कुर्वे ८१
१८६. नागेन्द्रहाराय ८१
१८७. भगवति मातर्नमस्तुभ्यम् ८२
१८८. विश्वासस्याभावः ८२
१८९. शिवो वसति रजताद्रौ ८३
१९०. पूर्वं स्वमनुशाधि ८३

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

१९१. जनन्या अङ्कः ८४
१९२. तितउ सहस्रच्छिद्रम् ८४
१९३. परमे धाम्नि महेशः ८५
१९४. मृगेन्द्रः ८५
१९५. दोलय पुच्छम् ८६
१९६. मन्दं वाहि समीरण ८६
१९७. पारेविश्वं प्रियो मे ८७
१९८. सर्वमेव मनोहरम् ८७
१९९. काकः ८७
२००. मातर्भूमे ८८
२०१. मार्गदर्शनम् ८८
२०२. त्वरय न नापि विलम्बय ८९
२०३. सतां महिमा ८९
२०४. अत एव वाहि पवन ८९
२०५. रौतु न वा चरणायुधः ९०
२०६. अक्लेशो विरहे ९०
२०७. श्रीसरस्वत्योरसङ्गतम् ९०
२०८. मधुकरो द्विरेफः ९१
२०९. शिशुरयम् ९१
२१०. शून्यम् ९१
२११. परतन्त्रः ९२
२१२. कः श्रद्धां जागरयेत् ९२
२१३. भौमीयोऽयं हट्टः ९३
२१४. लसन्तु सन्तः ९३
२१५. लोकजीवनम् ९४
२१६. भक्तिर्यजमानस्य ९४
२१७. आसै तूष्णीम् ९५
२१८. माया ९५
२१९. सरो मानसं त्यक्त्वा ९५
२२०. धातुद्वन्द्वः ९६
२२१. अयं बालः ९६
२२२. गीतिः ९६

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

२२३. मधुकरमाहात्म्यम् ९७
२२४. मा कुरु तुण्डविवारम् ९७
२२५. प्रगतिः ९७
२२६. रूपं देहि जयं देहि ९८
२२७. ते चण्डचाण्डालाः ९८
२२८. भीतः काशः ९९
२२९. वियति गुञ्जसि ९९
२३०. यस्य यदा ९९
२३१. संवत्सराः यापिताः १००
२३२. नीरसतरुरेव १००
२३३. दीपावली ज्वलतु १०१
२३४. प्रकृतिमनुमन्यस्व १०१
२३५. सहकारतरो १०१
२३६. कनककुसुमभृङ्गः १०२
२३७. द्विरेफ वितर मधूनि १०३
२३८. ग्रहणम् १०३
२३९. अपदोऽहं न त्वपादोऽहम् १०३
२४०. आचरितं नहि सम्यक् १०४
२४१. त्रिशूलधर १०४
२४२. (अ) करुणा १०४
२४३. उदेमि रक्तः १०५
२४४. सारल्यं देहि बालस्य १०५
२४५. दृष्टिः १०६
२४६. विश्वं मित्रम् १०६
२४७. (अ) शान्तिः १०६
२४८. विषवृक्षः १०७
२४९. खलव्याप्तिः १०७
२५०. आदौ सन्तोऽसुराश्चान्ते १०७
२५१. हरिश्चन्द्र १०८
२५२. भद्रं शृणु भद्रं बद १०८
२५३. धर्माधर्मौ १०९
२५४. धन्या वसुन्धरा १०९

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

२५५. जनुषः कारा १०९
२५६. जिजीविषा नैव ११०
२५७. रमय लिप्साम् ११०
२५८. न वेद्मि कोऽहम् १११
२५९. वृत्तिस्तास्करी १११
२६०. बुभुक्षा १११
२६१. सुधा विपदाम् ११२
२६२. वात्सल्यरसधानी ११२
२६३. ममत्वम् ११२
२६४. कल्लोलजालं मधुकटुमयम् ११३
२६५. त्वमेव धनपतिरेधि ११३
२६६. तितिक्षा ११४
२६७. गजपतिः ११४
२६८. स्वच्छतराः पशवः ११४
२६९. विद्वन् का तव चिन्ता ११५
२७०. चेरापुंजी ११५
२७१. महिमा प्रजापतेः ११६
२७२. शाखामूलीयम् ११६
२७३. कवितारमणी ११६
२७४. भुङ्क्ष्व तदेव ११७
२७५. मानसमाक्रान्तम् ११७
२७६. अनन्तशक्तिः प्रकृतिः ११८
२७७. सत्यमीक्षस्व शान्तः ११९
२७८. भुवः काव्यम् ११९
२७९. यात्रायां कष्टमनिवार्यम् ११९
२८०. अनुमन्यस्वात्मानम् १२०
२८१. विरही हंसः १२०
२८२. यथातथम् १२१
२८३. अनुवदति शुकः १२१
२८४. अवतारः १२१
२८५. असत्यबलम् १२२
२८६. तितिक्षार्थी १२२
२८७. तृणाय मन्यस्व हालिकान् १२३
२८८. यत्र यियाससि ततो याहि १२३
२८९. मन एव १२३

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

२९०. कोऽस्ति कस्य १२४
२९१. चिन्त्यम् १२४
२९२. धीरः १२४
२९३. सम्मानः १२५
२९४. रक्तः प्रभाकर उदेषि १२५
२९५. रविं वन्दे १२६
२९६. बालो दुर्ललितः १२६
२९७. बिन्दौ सिन्धुः १२६
२९८. रमणीनां मण्डनं सर्वम् १२७
२९९. आददे चित्रम् १२७
३००. क्रन्दति सरस्वती १२८
३०१. उच्चैर्गन्ता १२८
३०२. पुच्छं न चालय मृगेन्द्र १२८
३०३. कस्त्वम् १२९
३०४. किं ते महाजलनिधे १२९
३०५. उत्तिष्ठ देव १२९
३०६. दम्भः १३०
३०७. रे रे मानसराजहंस १३०
३०८. मधु नवनवम् १३०
३०९. धर्मो मनुजस्य १३१
३१०. शिवता १३१
३११. चिराय नैकत्र १३२
३१२. अश्वत्थतरो १३२
३१३. कीदृक् तवायं मदः १३२
३१४. राजहंसः १३३
३१५. स्वार्थः १३३
३१६. सत्यम् १३३
३१७. गृहागतः संन्यासी ११३
३१८. विरति वियोगे १३४
३१९. जयति धरित्री १३४
३२०. दुष्प्रपञ्चो नमस्यः १३५
३२१. द्वारमपावृणु १३५
३२२. सन्तोऽसन्तः १३५
३२३. तटाकः १३६
३२४. पन्थाः कुलपतेः १३६

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

३२५. उपकृतिज्ञः १३६
३२६. सत्यमेकं पिपासा १३७
३२७. मनोः सर्गः १३७
३२८. त्वममरः १३७
३२९. स्पर्धागर्वाः सदा खर्वाः १३८
३३०. शिवस्य करुणा १३८
३३१. फलं सात्त्विकम् १३९
३३२. शुक नो द्विजस्व १३९
३३३. शङ्करः शं तनोति १३९
३३४. स्तुतिः १३९
३३५. मशकः १४०
३३६. श्री विश्वनाथ श्री वेङ्कटेशीयम् १४०
३३७. नीचैर्गामी १४१
३३८. परधर्मः १४१
३३९. लघुर्द्विजः १४१
३४०. भ्रान्तिः १४२
३४१. भावास्त्रयः १४२
३४२. स्वास्थ्यम् १४२
३४३. सतां सङ्गोऽसद्भिः १४३
३४४. शतबिलम् १४३
३४५. अमरता १४३
३४६. शीलं रामस्य १४४
३४७. महत्त्वाकाङ्क्षा १४४
३४८. नियमाः १४४
३४९. उपदेशो मार्जायाः १४४
३५०. कालचित्रम् १४५
३५१. गृहः १४५
३५२. गीतिः १४५
३५३. दैत्याः १४६
३५४. जीवति हन्यमानः १४६
३५५. वयं हि सरलाः १८६
३५६. असदनुबन्धाः १४७
३५७. त्वमहं तदिदम् १४७
३५८. एधि त्वमेव १४७
३५९. श्रेयान् स्वधर्मः १४८
३६०. गर्जनम् १४८

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

३६१. सविता १४८
३६२. रथ यात्रा १४९
३६३. सुषमा १४९
३६४. गगनकुसुमम् १४९
३६५. अविकारी रसः १५०
३६६. नमामि तव महिमानम् १५०
३६७. उच्चैर्जिगमिषा १५१
३६८. अतिथिर्वाऽऽतिथेयो वा १५१
३६९. कुत्र गच्छेम १५१
३७०. चलत्येकेन पादेन १५२
३७१. कः शमयेत् १५२
३७२. तुभ्यमेव १५२
३७३. यन्मनसा न मनुते १५३
३७४. अलघु १५३
३७५. वटः १५३
३७६. रे पान्थ १५४
३७७. गङ्गाऽहम् १५४
३७८. काव्यं तदेव काव्यम् १५४
३७९. कलहः प्रकृतिः १५५
३८०. कृषकजननी १५५
३८१. बुभुक्षितो रसराजः १५५
३८२. नावि स्थितः १५६
३८३. महतां लघुपरिक्रमा १५६
३८४. जन्माष्टमी १५६
३८५. इतो वा ततो वा १५७
३८६. अम्भोधरः १५७
३८७. शिवाशिवम् १५७
३८८. रथध्वजः १५८
३८९. तपस्वी त्वम् १५८
३९०. मूलमस्मि १५८
३९१. परीक्षा १५९
३९२. याहि सूर्य १५९
३९३. रिक्थम् १५९
३९४. जयति शिशुः १६०
३९५. हर हर शम्भो १६२

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ॐ नमः शिवाय

सन्ध्या

जगन्नाथः स्वामी

जगन्नाथः स्वामी दुरितमखिलं हन्तु जगतः
शिवं भव्यं भूयात् सुकृतसुभगं स्वायति सताम् ।
सतां सद्भिः सङ्गः सकलमपि लोकं रमयतु
सुविद्यानामाभा प्रसरतु धरण्यां च गगने ॥

नववर्षाभिनन्दनम्

वर्षोऽयं नवलः स्तान्
नवलानन्दप्रदः सहृदयानाम् ।
सतां शक्तयोऽश्रान्ताः
सर्वत्रैव प्रवर्धन्ताम् ॥
नवे वत्सरे विश्वनाथस्य शान्तं
शिवं विक्रमं तं समाराधयाम ।
मनोज्ञामनोज्ञं पवित्रापवित्रं
शिवं यत्र संभूय सर्वं क्षणेन ॥
विरुणद्धि कमपि कश्चन
लोकेऽनुरुणद्धि कमपि कोऽप्यथवा ।
विश्वेशस्य कुटीरे
सर्वेषां मङ्गलं सर्वम् ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अटवी शुष्का

शुष्कैषाऽस्त्यटवी न मूलमपि नो पत्राणि शाखा न च
क्वाप्याशा फलसन्ततेरपगता नास्यां पिकः कूजति।
मालाकृत् ! स्तुतिभाजनं त्वमनिशं सिञ्चन् पयोभिस्तरून्
व्यर्थः किन्तु तव श्रमो, नहि मृतः प्राणान् दधाति क्वचित् ॥

स्वगतं पिकस्य

उपहसामि कदापि न काँक्षितं
मधुरवागपि काक सखे तव।
तदपि नो सहसे पिकतां मम
कथमहं स्वगुणं विसृजानि भोः ॥
जगदिदं सदनं सदपद्रुहां
विरलतामिह याति सुहृज्जनः।
किमपि संस्क्रियतामथवा न वा
नहि मुदे वसुधातलमस्ति मे ॥

त्रयोऽपि जीवेम मुदा

हिनस्त्यहिंसां हिंसा
हिंसामपि ततोऽधिकमहिंसैव।
अत एव सुधिय आहुः
परमो धर्मस्त्वहिंसैव ॥
हिंसाऽस्त्र"मेवकार"
स्तथाऽ"पिकारोऽ"स्त्रमस्त्यहिंसायाः।
त्रयोऽपि जीवेम मुदा
जीवेज्जीवेश्च जीवेयम् ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

उपदिश कदापि न गुरो

उपदिश कदापि न गुरो
सत्यमहिंसां कृपया स्वशिष्याय ।
जीवन्नपि स मृतः स्यात्
स हि सिद्धान्तान् दधज्जगति ॥
अधिकाधिकं सुवर्णं
कान्ताः शतशः सुवर्णफलभूताः ।
उत्तमपदाधिकारा
उत्तमभवनानि काम्यानि ॥
यया कयाचन शैल्या
लभ्यानीमानि भूतलेऽस्मिन्त्स्युः ।
तामेवोपदिश गुरो
शिष्यहितं चेत्तवाभीष्टम् ॥
हंसाः प्रहिताः पल्वल
आरामे मानसे च वकधूर्त्ताः ।
शुष्के पिकाश्च विपिने
सहकारवने तथा काकाः ॥
किं ब्रूयां सन्तस्तु
पर्णकुटीभ्योऽपि बहिष्कृताः सन्ति ।
ता अधिवसन्त्यसन्तो
दिवा, सुहर्म्याणि निश्येव ॥
जहि गिर आदर्शानां
पुरातनानां दुरागृहीतानाम् ।
पुनः पुनर्गाय गुरो
गीतानि यथार्थनग्नानि ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्यजाभिमानम्

त्यजाभिमानं सर्वं
शून्य स्त्वमसि सलिलस्य बुद्बुदवत् ।
आविर्भूय विलीनः
क्षणात् स्वरूपे भवस्येव ॥
पापं पुण्यं दुःखं
सुखमेवं च शीतं तथा चोष्मा ।
शत्रुर्मित्रं ग्लानि-
र्विजयः सर्वेऽपि परधर्माः ॥
लघुं स्वविन्दुं सद्यः
महासमष्टिजलधौ निमज्जयतात् ।
तदनु कीदृशी चिन्ता
सर्वोऽपि त्वं महाजलधिः ॥

आततायिनमायान्तम्

सत्यं यस्य बलं किमन्यबलकैः सत्यं स्वयं जीवति
नासत्यं श्वसिति स्वयं क्षणमपि क्वाप्यन्यपक्षं विना ।
कुर्युः सत्यबला निहन्तुमसतः किं, तत् समाधीयते
दण्डं दुर्दममाश्रयन्तु सुधियो निघ्नन्तु तान् निर्ममम् ॥
व्याघ्रो हिंसामतिं जह्यात् किं श्रद्धासुमनोभरैः ।
जिघांसुं तं जहि क्षिप्रं शतघ्न्या, न विचारय ।

अनुगृहाण सरस्वति

त्यक्तोऽहमस्मि रमयाऽर्थशुचिः प्रबुद्ध-
स्त्यक्तोऽहमस्मि कलया विकलः सदैव ।
त्वञ्चेत् सरस्वति न दर्शयसि स्वरूपं
नानुग्रहं च कुरुषे किमहं विदध्याम् ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

करुणा स्वतन्त्रा

यत्र करुणा स्वतन्त्रा
कविता रम्या उद्यन्ति तत एव ।
परतन्त्रायां तस्यां
कः काव्यं कुत्र किं पश्येत् ॥

मत्तानां समवाये

मत्तानां समवाये
दण्डकराणां नृणामसाध्यानाम् ।
को गणयेत् सौहार्दं
करुणामथ सौमनस्यं वा ॥
विस्मर कृत्स्नं शास्त्रं
सपदि समुत्तोलयास्त्रशस्त्राणि ।
नो चेदपसर कुहचिन्
नादरभाक् ते गुरुत्वमिह ॥
अथवा यथा ब्रवीमि
नवा रचय रोचिका मधुरवार्त्ताः ।
मादय मत्तान् पुनरिह
गायं गायं स्वगीतानि ॥

असूया

खद्योता न परःशता यदि तमो निघ्नन्ति, तत्रैव चेद्
उद्यन्नेव विधुः प्रसारितकरो ज्योत्स्नां तनोत्येकलः ।
दोषः कोऽस्ति विधोस्तदीयसुषमाप्राणस्य सूर्यस्य वा
द्वाभ्यां व्यर्थं मिमेऽन्धकारसुहृदोऽसूयन्ति खद्योतकाः ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सद्दुर्जनीयम्

तुष्यति सज्जनहृदयं
परोपकारेण पूर्णसफलेन ।
तुष्यति दुर्जनहृदयं
परापकारेण सकलेन ॥

साधो किमिहाऽऽसक्तः

साधो किमिहाऽऽसक्तस्त्वदीयमस्तीह न किमपि क्वापि ।
आवासः परकीयः सर्वमत्र तव परकीयम् ॥
त्वरसे कथं न साधो पर्णकुटीरं निजं न किं व्रजसि ।
शाकं द्विदलं भक्तं सर्वं तत्र त्वदीयं स्यात् ॥

कान्दिशीकः

न त्वं त्यक्ष्यसि मां कदाऽपि भगवन्नित्याशया निश्चलः
क्वाप्यन्यत्र न यामि याच उत वा किञ्चित् कमप्यन्यतः ।
त्वं सर्वं स्वयमेव पश्यसि विभो दत्से यदिष्टं मम
किं तद्यत् करणीयमस्ति मयका शम्भो न तद् वेद्म्यहम् ॥
धत्से त्वं गरलं गले च भसितं गात्रे कलां मूर्धनि
धत्से वृश्चिकपन्नगान् कनकभुङ् मुण्डस्रजं कामधुक् ।
धत्से देवनदीं जटास्वजगवं पाणौ पराम्बापते
धत्से सर्वमपीह तत्र परितस्त्याज्यः कथं स्यामहम् ॥
विश्वस्तोऽपि यदा कदापि जगतस्तैस्तैर्भरैराकुलः
सीदामीव बिभेमि चापि कुहचिज्जिह्रेमि चिन्तावशः ।
शक्तिं ते परमां क्षणेन महितां पश्यामि तां विस्मितो
या हन्ति स्वयमेव सर्वदुरितं भाराँश्च सर्वान् क्षणात् ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वायवायाहि

नीरूपस्त्वं वायो
स्पर्शैः समनुगृह्णासि रूपाणि ।
अक्षरमप्यव्यक्तं
स्पर्शयसि च तत्प्रथमदूतः ॥
अदृश्यगतिमन् वायो
मूर्त्तामूर्त्तमध्यस्थतां भजसे ।
मूर्त्तामूर्त्तप्रणय-
प्राणप्रद हे नमस्तुभ्यम् ॥
न स्पृश्यसे कदाचित्
स्पर्शं स्पर्शमपि तानि रूपाणि ।
स्वतन्त्रगतिमन् वायो
नमो नमस्ते महाशक्ते ॥
प्रसेदिवान् संगीता-
न्याधत्से तरुषु च वेणुरन्ध्रेषु ।
कुपितस्तूद्धरसि तरून्
उद्वेलयसि च महाजलधिम् ॥
रुद्रस्य त्वं प्रथमः
शिवस्य चासि दूतोऽप्रमेयगतिः ।
स्पर्शय तोषय देवं
शिवं समीरण नमस्तुभ्यम् ॥

सरलानां सरला गतिः

सरलानां सरला गति-
रुच्चैस्तमामेते स्वयं यान्ति ।
कुटिलानां कुटिला
गतिरेते नीचैः स्वयं यान्ति ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नाश्रयसे स्वभावम्

स्वायत्ततां मनुज कामयसे तथापि
नित्यं तदेव कुरुषेऽन्यवशो यथा स्याः ।
स्वर्णं कदाचिदपि लौहमथापि कान्तां
राजानमाश्रयसि नाश्रयसे स्वभावम् ॥

स्वार्थः

आलापा व्यर्थास्ते
तथा सुधारमय्योऽथवा वाचः ।
ध्रुवमेकमेव सत्यं
सर्वः स्वार्थैकलक्ष्योऽस्ति ॥
स्वार्थोऽपि च नहि हेय
आध्यात्मिक आधिभौतिको वाऽपि ।
प्रतिवेशिप्रतिकूलः
स्वार्थो नूनं परित्याज्यः ॥
विस्मर परस्वबुद्धिं
स्वस्मिन्नपरं परेषु पश्य स्वम् ।
परमानन्दमवाप्स्यसि
शिवं दधानश्च भुञ्जानः ॥

मार्जारं प्रति

सिंहस्य प्रतिरूपं
धत्से मार्जार नात्र सन्देहः ।
किन्तु न गजेन्द्रमुक्तां
स्पृहय सुहृन्नापि युध्यस्व ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजाहं विपिनस्य

क्रीडां तां सुनियन्त्रितां परवशः प्रादर्शयं ताः समाः
बद्धो नीरसलौहपञ्जरगृहे ग्रासान् प्रदत्तान् भजन् ।
सोऽहं मुक्तपदोऽद्य यामि विपिनं गेहं स्वकीयं मुदा
कश्चित् पश्यतु वा न पश्यतु निजां धास्यामि लीलां हरिः ॥
राजाऽहं विपिनस्य नागरकुले यातः कथं वश्यतां
जाने नैव, न मे बभूव च ततः काचिद् व्यथा तानवी ।
कष्टं केवलमेकमेव "नहि मे शौर्यं स्वतन्त्रं ततः,,"
"कश्चिन्मामनुशास्तु दुर्बलतरो जीयेय तेनाप्यहम्" ॥
ग्रासार्धं तु वितीर्य मे मम पतिर्मामद्य मुक्तं व्यधात्
मुक्तः सोऽहमितः स्वराज्यमुदितो गच्छामि वायूपमः ।
पन्थानो मम सन्तु मङ्गलमयाः शीघ्रं गृहं प्राप्नुयां
वन्या मे सुहृदो भवन्तु मुदिताः शक्ताश्चिरं जीविनः ॥
शिवं शिवतरं पुनः शिवतमं समं क्रीडितं
ममापि सुहृदां तथा सततमस्तु सर्वोज्ज्वलम् ।
न किञ्चिदपि याचतां कमपि कोऽपि तृप्तः स्वयं
समे स्वयमिहात्मनां प्रभव आत्मनो विभ्रतु ॥

प्रणमामि शिवम्

शिव एव ममास्ति सखा परमः
स हि तानपि मां च भुनक्ति सदा ।
करुणावरुणालय एष विभुः
परमां करुणां तनुतां परितः ॥
न कुतोऽपि, बिभेति स शक्तिपति-
र्न स वाञ्छति किञ्चिदपीह ततः
मम सोऽस्ति शिवः प्रभुरात्मनिधिः ।
प्रणमामि शिवं च भजामि शिवम् ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिवेन दत्तं शिवं भुङ्क्ष्व

गमनमागमनशील-
मागमनं चानिशं गमनशीलम् ।
विपत् सम्पदाशीला
सम्पच्चास्ते विपच्छीला ॥
गमनेऽप्यागमनं यो
गमनं च य ईक्षते समागमने ।
विपदि सम्पदं सम्पदि
विपदं, सर्वं शिवं तस्य ॥
निजं, त्वदीयं किमपि न
शिवस्य सर्वं शिवात्मनः प्रथितम् ।
न विभेहि नोद्विजस्व
शिवेन दत्तं शिवं भुङ्क्ष्व ॥

अपि मिथ्यैवादर्शा;

घ्नन्तोऽपि मिथः सर्वे
खलाः समेताः सतां निकृत्यर्थम् ।
सन्तः कयमपि तेषां
नादरभाजः क्वचिन्महिताः ॥
परसम्पदं विलुण्ठय
साधुशिरोमणिपदं खला दधति ।
असत्यभषणा अपि ते
जयन्ति सत्ये हरिश्चन्द्रम् ॥
अपि मिथ्यैवादर्शा
अपि च सत्या मायाविनां मायाः ।
मिथ्यैवाराध्यं किं
सत्यं किं त्याज्यमस्ति सताम् ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सीमाऽसीमम्

शक्तिरनन्ता शक्ते-
राद्यायाश्च सुतरामनन्तायाः ।
सीमनि बद्धाः सर्वे
प्रायस्तां नैव वीक्षन्ते ॥

कूजितं व्यर्थम्

कूजितमिह ते व्यर्थं
नाम्रवणमिदं फलेग्रहि स्यात् ते ।
सेचनकर्मणि निरताः
पातुं व्यग्रा न पाययितुम् ॥
कश्चिद् भनक्ति शाखाः
प्रतिसन्ध्यं भक्तसूपपाकार्थम् ।
बध्नाति कोऽपि महिषी-
स्तन्मूले दुग्धविक्रेता ॥
तस्मात् कोकिल नचिराद्
वनान्तरं किमपि सेवितुं गच्छेः ।
मधुरं कूजितमेभ्यो
न रोचते स्वार्थकटुकेभ्यः ॥

कूजितं सार्थम्

मा भूः क्वापि निराशो
मा त्यज सहजं स्वकूजितं पिक हे ।
शुष्कं रसालवनमपि
मधुरं तव कूजितेन स्यात् ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्यज्यतां पक्षपातः

आद्यात् कालात् सृष्टेः
देवाश्च निशाचराश्च युध्यन्ते ।
अनुदिनमनुपलमेतद्
युद्धं परितः प्रसक्तमिदम् ॥
मानवजातेरेकः
परमो दोषः पक्षपातविधिः ।
कदाचिदसुरे पतति
सुरे कदाचिच्च पक्षोऽस्याः ।
अलमेभिर्भ्रमजालै-
र्मानव को लाभः पक्षपातेन ।
शिवस्य वरयात्री भव
समरसतां भज सुरासुरयोः ॥

प्रयोगः प्रकृतेः

पूर्वं कष्टं तदनु च
दन्ताः शनैः शनैः सम्प्ररोहन्ति ।
नचिरात् पुनः समे ते
गलन्ति शनकैर्विना कष्टम् ।
स्वयमावर्त्तन्ते ते
पुनरत्र शनैः शनैर्विना कष्टम् ।
उपकुर्वन्ति च रसनां
भोज्यं कठिनं मृदूकृत्य ॥
प्रकृतेरयं प्रयोगः
प्रवर्त्तते सर्वतो द्विरावृत्तः ।
प्रसूय पूर्वं तदनु च
भनक्ति भूयश्च योजयति ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सदाजयी मुदुलः

मृदुर्मनोजो निखिलं जगज्जयन्
मृदुर्मृगाङ्को जलधिं प्रकर्षयन् ।
मृदुर्मरालश्च वहँश्चतुर्मुखं
सदाजयित्वं मृदुलस्य शासति ॥

मूलं चेन्मातुरङ्के

मुलं चेन्मातुरङ्के विलसति पयसा सिक्तमस्याननं चेन्
नात्यूष्मा नातिशीतं न च हिमकरकावृष्टिपातो यदि स्यात् ।
सौन्दर्यं सत्त्वशक्तिं फलदविनयितामाप्नुतेऽसौ रसालो
बन्धो सूनो मनोस्तां कथमिह लमसे नैव शिक्षां तदीयाम् ।

न स्वामी न च दासः

अतिमूर्खा अतिगुणिनो
ऽप्यतिपाप्मानोऽतिधार्मिकाश्चापि ।
अतिखर्वा अतिलम्बा
अतिबलवन्तोऽतिदुर्बलाश्चैव ॥
अतिशयधर्माण इमे
मनुजा विषमीकुर्वन्ति विश्वानि ।
सर्वं चेत् सन्तुलितं
समरसतां नहि जगज्जह्यात् ॥
न स्वामी न च दासो
न द्रविणपति र्न चातिदुर्दीनः ।
नातिज्ञानविमत्तो
न चातिमूर्खोऽत्र दृश्येत ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

दार्शनिकः

गच्छेयं क्व चलेयं
कथमिति च न बेद्मि विस्मृतेर्वश्यः ।
तूष्णीं चतुष्पथेऽस्मिन्
स्थितः समीक्षे पथश्चतुरः ॥
गन्तव्यः कः पन्थाः
किं गन्तव्यं च वर्त्तते लंक्ष्यम् ।
स्मृतिपथमवतरति न मे
किमपि कुतश्चिन्न तद्विषयम् ॥
गच्छन्तो धावन्तो
ऽन्ये तु जना मामिह स्थिरं वीक्ष्य ।
दार्शनिकीऽहं पूज्योऽ
सामान्य इति मां नमस्यन्ति ॥

प्रकृतिमेव भजस्व महोत्सवाम्

प्रतिपलं प्रकृतिः खलु खेलति
हसति नृत्यति गायति वर्धते ।
मनुज एव दुरन्तपरिग्रहः
सहजभावनिरासविचक्षणः ॥
अवधृतः खलु कृत्रिममण्डनैः
सहजमण्डनमेष उपेक्षते ।
यदि कदाचन विस्मृतिविभ्रमः
स उररीकुरुते प्रकृतिं क्षणम् ।
भवति तस्य कदापि महोत्सवः
प्रकृतिसद्मनि योऽस्ति सदा स्वयम् ।
मनुज किं कनकैर्भवनैश्च ते
प्रकृतिमेव भजस्व महोत्सवाम् ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अर्थः श्रमजलविजितः

अपरिमितो यदि लोभः
स्वयं मृषा च हिंसा समायातः ।
सपदि ततश्चायान्ति
परितः कृच्छ्राणि भूयांसि ॥
भोगा न सन्ति हेया
लिप्साऽसीमाऽस्ति सर्वथा हेया ।
अर्थोऽपि च नहि हेयो
हेये चौर्यं च लुण्ठा च ॥
श्रमजलविजितो भूया-
नप्यर्थो नो कदाप्यनर्थकरः ।
स्तेयाहृता तु कणिका
ऽप्यनर्थजालं वितानयति ॥

त्वमसि नाप्यसि

शिव तवैव वशंवदतां गतो
गिरिश विस्मृतवान् सकलं निजम् ।
त्वमिह वाञ्छसि किं विषये मम
तदपि वेद्मि न दुःखमतो भजे ॥
जगति नैव कुतश्चन कश्चन
परहिते निरतः स्वरतो जनः ।
त्वमिह दर्शनदानपराङ्मुखो
ऽप्यवसि मामपि तानपि सर्वदा ॥
वदसि नैव तथापि विभो क्वचित्
किमपि नापि दृशां विषयोऽसि नः
त्वमसि धन्यतमः श्रुतिसम्मतः
त्वमसि नाप्यसि किन्तु शिवोऽसि मे ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नमामि गणपतिम्

नमामि गणपतिमीशं
विघ्नहरणं विघ्नेशमिभवदनम् ।
मूषकवाहनमनघं
प्रलम्बोदरं मधुररसिकम् ॥
महिमा तवातिशेते
ब्रह्माण्डं निखिलमेव, नो शङ्का ।
सत्त्वं जटिलं हस्तिन
आखोः कुटिलं च शास्ति जगत् ॥
सत्त्वे उभे अपि स्त
आवश्यके इमे गणाध्यक्षस्य ।
वक्रा मृदुला जटिला
शक्तिः साम्राज्यमाधत्ते ॥

रथविमानीयम्

गगने विमानचालन-
मुर्व्यां च रथचालनमतुलनीये ।
उभयोः सर्वं भिन्नं
भिन्नः पन्था गतिर्भिन्ना ॥
उत्पतनं च निपतनं
शून्ये गगने समीरवेगेण ।
मतिमच्चालकवत्त्वं
चेति विशेषा विमानस्य ॥
महीरथस्य तु पन्था
विषमो विषमाणि रोधतत्त्वानि ।
तीव्रं कदापि शनकै
रथी रथं स्वं प्रवर्त्तयति ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कामाख्या मे प्रसीदतु

मातस्त्वमेव गतिसूत्रमनुग्रहाणां
नायाति याति किमपि त्वदृते कुतोऽपि ।
नाद्राक्षमद्य तव मन्दिररूपमत्र
को हेतुरित्यनवबोधसमाकुलोऽस्मि ॥
जानामि सर्वमिह चापि ततोऽप्यदृश्यं
दृश्यं च मङ्गलमयं तव रूपमास्ते ।
चेतो दिदृक्षत इहापि तदेव रूपं
यत् पूजयन्ति मनुजा अधिमन्दिरं ते ॥
पुत्रो न तादृगिह यो नहि दोषभाक् स्यान्
माता न तादृगिह या न दयार्द्रभावा ।
शीघ्रं सुदर्शय तदेव निजं स्वरूपं
कामाख्यमत्र सकलेप्सितकामधाम ॥

वयं नियम्याः

त्वमसि नियामक ईश्वर
वयं नियम्यास्त्वयैव नान्येन ।
योऽस्ति स्वयं नियम्यः
कथं नियमयेत् स कं कुत्र ॥
नियमय सकला वृत्ती
र्ममापि लोकस्य चापि सर्वस्य ।
वर्धेत यथा मैत्री
स्वच्छा सर्वत्र सर्वेषाम् ॥
शमय सकलभवतृष्णा
आनय हृदयेषु परममौदायेम् ।
शिवं सुन्दरं सत्यं
सर्वं सर्वाणि पश्यन्तु ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

हे चन्द्रचूड

हे चन्द्रचूड मनसा वचसा च तन्वा
त्वां चिन्तयामि च भजामि वशंवदस्ते ।
अद्यास्ति ते परिणयो वरयात्रिणोऽपि
प्रेतादयश्च सुरलोकगणाः समेताः ॥
सर्वे परस्परविरोधिगुणा अपि त्वद्-
द्वारि स्थिता न कलहेषु रमन्त एते ।
तान् ब्रूहि हे शिव धरातलमप्युपेत्य
जीवन्तु तेऽपि च समानिह जीवयन्तु ॥

सुरभारती

सुरभारतीप्रणयितां
कोऽस्मिन् काले कुतः कयं भजताम् ।
अहमहमिकाभिरभितो
ऽसुरभारत्यो विजृम्भन्ते ॥
असुराणामेव गृहे
बन्दीभूतानि कनकानि सर्वाणि ।
यथाजीवनापेक्षं
कनकं सन्तोऽप्यभीप्सन्ति ॥
विश्वम्भरा वनानि
फलानि, शस्यानि, तृणानि, पत्राणि ।
वशंवदान्यसुराणा-
मेवामूनीह सर्वाणि ॥
सुरवाणीयं वन्द्या
ऽनवद्यवंशाऽऽत्मरूपसम्पन्ना ।
तेषां न भवेद् वश्या
भगवानेवं सुसाध्यतात् ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुवर्त्तय कर्माणि

अनुवर्त्तय कर्माणि
कर्मनिरोधेषु सत्स्वपि विपुलेषु ।
अनुवर्त्तितं हि कर्म
कर्मनिरोधानवरुणद्धि ॥
व्योम न स्पृशति भूमिविकारः
भूमिमम्बरगतोऽपि तथैव ।
निर्दिशन् भुवमपीतरलोकान्
एकलोऽचरचरानतिशेषे ॥
स्वां तनुं न शिव दर्शयसीह
प्रेक्षितुं तदपि वाञ्छति लोकः ।
एष रामपदभागपि जन्तुः
श्राम्यतीह च ततश्च निराशः ॥

प्रशासनम्

दमनं शमन द्वे अपि
शासनसरणो प्रशासनधुरीणानाम् ।
क्षणमेव जयति पूर्वा
सन्ततमेवापरा जयति ॥
सत्यं धैर्यं निष्ठा
सहानुभूतिरनुयायिवर्गेषु ।
लक्ष्योन्मुखता चैते
यत्र गुणाः शासकः स स्यात् ॥
स्वयमेव सर्व एव
समताजितास्तमनुग्रहीष्यन्ति ।
परस्परानुग्रहतः
सर्वं वर्धिष्यते तत्र ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वरं कूपमण्डूक एवाहमस्मि

वरं कूपमण्डूक एवाहमस्मि
सुखं कूपगम्भीरनीरे शयेऽहम् ।
न मे कोऽपि रागो न वा द्वेषभावः
प्लुतेरस्ति भूयान् ममेहावकाशः ॥
शृणोम्यस्ति भूमौ महासागरोऽपि
महत्त्वं च गाम्भीर्यमस्याप्रमेयम् ।
अधृष्यः स नक्रैरुपास्यश्च रत्नै-
रसौ मे नमस्यः शरण्यो नदीनाम् ॥
वरं नास्मि नक्रो महासागरस्य
वरं नास्मि वक्रो महाभूतलस्य ।
वरं नास्मि शक्रो महास्वर्गभूमे-
र्वरं कूपमण्डूक एवाहमस्मि ॥
पुरा पूर्वजा ऊषुरत्रैव धन्या
मदीया यदा विश्वनाथोऽपि शम्भुः ।
महीपङ्कशौधार्थमत्रोपयातः
स तान् स्वानुकम्पासनाथान् व्यधत्त ॥
जटाधारिगङ्गाजलैः कूपनीरं
तदारभ्य पूतं विशेषेण हृद्यम् ।
प्रसन्ना निवासे लघौ सर्व एव
वयं गौरवं गीतपूर्णं भजामः ॥
तरङ्गा न वैषम्यनैर्घृण्ययोस्ते
कदाप्यत्र दृग्गोचराः क्वापि सन्ति ।
प्रसन्ने जले सर्वदाऽहं प्रसन्नो
वरं कूपमण्डूक एवाहमस्मि ॥
अधस्ताद् भुवः कर्हिचित् कर्णयोर्मे
समायान्ति वार्त्ता भुवो द्वेषमय्यः ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वयं तु स्वकीयानि गीतानि तानि
गदामः सदोच्चैर्मुदा वीतरागाः ॥
इतो व्योम्नि नक्षत्रपुञ्जं सुदीप्तं
निशायां सुदर्शं मनोहारि वीक्षे ।
वरं नैव पश्यामि विद्युत्प्रकाशैः
तमःसंवृतान् मानवानां निवासान् ॥
अतो मां न कूपः कदाचिद्दुनाति
गुणग्राहितां पण्डितोऽप्यस्य वेत्ति ।
प्रसन्ने जले सर्वदाऽहं प्रसन्नो
वरं कूपमण्डूक एवाहमस्मि ॥

शून्यगमन एव मही

शन्यगगन एव मही
भ्राम्यति गगनमेव च सदनमस्याः ।
तथापि सर्वेऽप्युच्चै-
र्नीलं गगनं दिदृक्षन्ते ॥
ज्योतिःपुञ्जमसूक्ष्मं
दूरे दृश्य मिति सदनमपि गगनम् ।
अस्मद् दूरीभूतं
स्थूलैकाधारदृष्टिभ्यः ॥
सर्वेषां स्वं रूपं
स्वात्मा, स्वात्मा च समस्य विश्वस्य ।
तथैव दूरे दृश्यो
ज्ञानैर्ध्यानैस्तपस्याभिः ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिव नय तस्मिन् ग्रामे

अप्यायास्यति दिवसः
कदाचिदीदृग् यदा शिवं सर्वम् ।
दृश्यं श्रव्यं वाच्यं
स्यान्मङ्गलमेव सर्वत्र ॥
शृणोम्यभद्रं परितः
पश्यामि तदेव दिवा च रात्रौ च ।
शुश्रूषा च दिदृक्षा
जाता तादृक् तथाऽभ्यासात् ॥
शिव नय तस्मिन् ग्रामे
मां यत्राहं समीर इव सुखदः ।
सर्वेषां भूयासं
सर्वेऽपि च यत्र मम सुखदाः ॥
नाशा नहि च निराशा
लिप्साऽपि नहि, न यत्र चाभावः ।
समरसतायां सर्वे
यत्र रमन्तां च रमयन्तु ॥

अप्येवम्

"अप्येवयो"विरोधेऽस्मिन्न्"अपि"रेव विशिष्यते ।
हिनस्त"यपि"नं किमपि हन्त्ये "वैवो" निजेतरत् ॥
अहमेव स एव त्वमेव "चैव-"भ्रमास्त्रयः ।
"अपिना" नचिरात् सर्वे हन्यन्तेऽमी भ्रमास्त्रयः ॥
एकमेवाद्वितीयं सद् ब्रह्मानन्दशिवं परम् ।
असद्भि"रेवकै"श्छन्नं श्रूयते न च दृश्यते ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

बकाः समे धन्यधन्याः स्थ

अभिनन्द्यं वः साहस-
मस्ति, बकाः समे धन्यधन्याः स्थ।
मानससरसो हंसाः
सद्यो निष्कासिताः सर्वे॥
अधिवसत सरो निर्भर-
मम्बजषण्डमपि सपदि नाशयत।
इह मत्स्थानानयत
भक्षणाय च चिररात्राय॥
सर्वमिदं सोढव्यं
किन्तु न सोढव्यमस्ति धौर्त्यं वः।
नीरक्षीरविवेक
ख्यातिचोरयथ धिग्धिग् वः॥

गतिर्मे निजा

न जाने ममाभीप्सितं किं तथापि
क्वचिन्निर्जने काननेऽहं भ्रमामि।
क्वचित् कण्टकाण्येव बर्बूरकाणां
क्वचित् पाटलाः पुष्पकण्टावलग्नाः॥
कदाचित् कुतश्चित् कथञ्चित् सरोऽपि
लभे तादृशं मानसं रम्यरम्यम्।
यतो नीरजान्येव चित्तं हरन्ति
न यत्रास्ति नक्रः क्वचिद् गूढभावः॥
क्व गन्तव्यमस्तीत्यजानन्नपि स्वं
सदा पाणिपादं क्वचिच्चालयामि।
चलामि भ्रमामीह तत्रापि शून्ये
गतिर्मे निजा, किं न लक्ष्यं मदीयम्॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कनकपरीक्षा

निकषोपलनेव हृतं
निबिडतमसि विटैर्दस्युभिर्धूर्तैः ।
कनककारतनयोऽयं
परिचिनुयात् केन सत्कनकम् ॥
कनकान्यसन्ति ददति
कानरा आदित्सवः कनकमूल्यम् ।
मोहयन्ति शास्त्रार्थै-
स्तनयं तं बोधसम्मूढम् ॥
प्रसेदुषी गुञ्जेयं
तोलयत्यमूल्यानि दुष्कनकानि ।
सुतः कुलीनो विलपति
सदसत्सममूल्यतां वीक्ष्य ॥

पिपीलिके

पिलीलिके तव दंशं
सहे कृपालुः, समाः शतं जीव्याः ।
तथाऽपि नाहमशक्तो
निश्वासो मेऽस्त्यलं तुभ्यम् ॥

त्वं योग्यः

सिद्धान्तान् पठ लोकमध्य उचितान् सर्वांशतः पुण्यदान्
गेहे लुण्ठकतां भजस्व कृतिभिर्वाग्भिर्मनोभिः सदा ।
इत्थं द्वे सरणी समाकलयितुं चेद्योग्यताऽस्ति त्वयि
त्वं योग्यः सकलं विधातुमिह वा तत्रापि वा सर्वतः ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कूज कोकिल

कूज कूज रे कोकिल
कूज मधुरमेव सन्ततं परितः।
शृणोतु कश्चिन्नहि वा
कूजैवात्रापि तत्रापि ॥
विरहिभ्यो यदि मधुरं
तव संगीतं न रोचते रुचिरम्।
छिन्नं किं तव तेन
कूजैवात्रापि तत्रापि ॥
अरसिकजनं न सहते
स तु कश्चिन्मानवः कविम्मन्यः।
त्वमचिन्त्यभेंदमधुरं
कूजसि, कूजैव सर्वेभ्यः ॥

जय हरिहरनाथ

जय हरिहरनाथ त्वामृते मेऽस्ति कोऽन्यः
सकल इह समाजः स्वार्थरक्तः स्वदासः।
अजगवकर आर्त्तत्राणलक्ष्यः पुरारे
भवमकरनिगीर्णं त्राहि मां बद्धहस्तम् ॥
जगदम्बिके भगवति
कृपैव ते मां सदैव पुष्णाति।
संहर नैव कदाचन
सहजान् स्वीयान् कृपाकिरणान् ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिशोर्हसितम्

यत्र न शिशोर्विलासः
को निवसेत् कथं तत्र विलसेद्वा ।
न किमपि तस्मिन् गृहके
यत्र शिशोः क्रन्दनं नास्ति ॥
न दिदृक्षे नृपतिमुखं
नापि च रमणीमुखं सुधासदनम्
प्रकृतेः फुल्लं कुसुमं
मुखं दिदृक्षे शिशोर्हसितम् ॥
निर्दोषोऽयमबोधः
सरलो विरलोऽनिमित्तहाससुमः ॥
आक्रन्देऽपि सुमधुरो
दुर्ललितशिशुश्चिरं जीयात् ॥

जय गङ्गे

शिवजटाशिवदाङ्कविहारिणि
परमपावननीरवहे शिवे ।
सुरसरित् सुरलोकविमानदे
जननि मङ्गलदा भवतात् सताम् ॥
इह तु सङ्गम एष मनोरमो
यमुनया सुतया तरणेः शुभः ।
सकलमेव बिभर्त्ति पुनाति च
सुकृतिनोऽपि च दुष्कृतिनः समम् ।
मकरसङ्क्रमणे तरणेर्विभो-
रिह सुसङ्गम एष तु जङ्गमः ।
अभिनवं वितनोति तटेषु ते
शुचिमनोज्ञसुमङ्गलसङ्गमम् ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विश्वं शिवम्

स्वार्थविहीने स्वान्ते
भगवानुदेति वरदो दयासिन्धुः ।
यत् किमपि वाञ्छनीयं
वाञ्छां विनैव स पूरयति ॥
पश्य शिवं स्मर च शिवं
भज नित्यं शिवं तथा शिवं प्रणम ।
सचराचरं जगदिदं
शिवादृते नहि किमप्यन्यत् ॥
नटराजः स कलाधर-
शेखर ईशस्त्रिशूलवरहस्तः ।
गङ्गाधरः कपर्दी
कण्ठेकालोऽल्ति भस्माङ्गः ॥
अशिवाभरणोऽपि सदा
शिवः समैषां सदा मृडः शिवदः ।
तदनुग्रहेण यदि तन्-
मयोऽसि विश्वं शिवं नान्यत् ॥

हसति धरित्री

हसति धरित्री शस्यै-
र्हरितै रसमयीयं महोल्लासा ।
हसति ध्वजोऽपि गगने
मरुता क्रीडँश्चलद्वासाः ॥
हसति समस्ता प्रकृति-
श्चेतनसङ्गाप्यचेतना वाऽपि ।
इमे चेतना मनुजा
अहासिनोऽमूं जिघांसन्ति ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मनश्चित्रम्

आकाङ्क्षा अपि दत्ता-
स्त्वयैव भगवन् सुखैषणामय्यः ।
तर्हि बहिः कथमनिशं
दुःखान्येवात्र पश्यामि ॥
मनःपटे चित्राणि
सन्ति विचित्राणि सुखस्य भूयांसि ।
जगति तु विपरीतानि
सर्वत्राप्नोमि विम्बानि ॥
भगवँस्तवैव दयया
तथापि सर्वं शिवं भवत्येव ।
यदपि मनसि चित्रं तत्
परिणमति तथैव लोकेऽपि ॥

धर्मरथः

गोस्वामिनो धर्मरथोऽपि भग्नो
विवेकशक्तिस्तुरगोऽपि रुग्णः ।
कथं जयेद्रावणमद्य रामो
रक्षा मुनीनां कथमत्र सिध्येत् ॥
रामो धनुर्बाणधरोऽप्यशक्तो
विश्वासपात्रं न चमूर्नराणाम् ।
न वानराः सन्त्यपि योजनीया
रामः कथं जीवतु लोकभक्तः ॥
समूह एवाद्य बलं खलानां
न सौमनस्यं सुलभं कुतोऽपि ।
यथा कथञ्चिद् वचनानि दत्त्वा
सुधीजनो जीवति धूर्तदासः ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वन्दिनः सन्तः

संस्कृतिर्नहि, न संस्कृतवाणी
संस्कृता व्यवहृतिर्न च यत्र ।
कस्य तत्र पलमप्यधिवासः
संस्कृतस्य, नरके, सुजनस्य ।
कुत्र यातु सुजनो मृदुभावः
सर्वतः कटुमयेऽत्र समाजे ।
तस्य सत्यमपि सज्जनताऽपि
कर्त्तुमर्हति न किञ्चिदपीह ॥
अद्य शक्तिरपि पक्षधराऽस्ति
दुष्कृतां दुरितजीवनकानाम् ।
वन्दिनो हि सकला अपि सन्तः
सन्ततं मृदुगुणा इह तेषाम् ॥

जटिलता

जटिलता जगतः सततं सतो
ऽभिभवति प्ररुणद्धि च तद्गतिम् ।
सरलताऽपि निसर्गकृता सतां
कथममी जटिलत्वमधीयताम् ।
सरणिरस्त्यसतां कुटिला सदा
जटिलताऽपि तथा सह राजते ।
सरलता प्रकृतिः सततं सतां
जटिलता तदपीह नं निन्दिता ॥
जटिलता सरलत्वसुसङ्गता
सकललोकहिताय सदाशया ।
जटिलता कुटिलत्वकुसङ्गता
सकललोकवधाय दुराशया ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

(अ) परिग्रहः

परिग्रहः संन्यासो
द्वावपि सतामपरिहार्यतां पातः
पूर्वः परतोषार्थं
निजतोषार्थं तथा चान्यः ॥

अम्भोनिधिः

अम्मोनिधिस्त्वमसि रत्ननिधिर्गभीरो
नद्यः समास्तव समाश्रयमर्थयन्ते ।
अक्षय्यजीवननिधे निजजीवनानि
मेघेन यक्षसुहृदा विसृजाखिलेभ्यः ॥
मा भूः कदापि कृपणो विषमावदान
उद्घाट्य स्वनिधिमात्मपरेभ्य उर्व्याम् ।
त्वं चेद् वृणोषि सरणिं कृपणाधमाना-
मौदार्यमेव निखिलां जगतीं विजह्यात् ॥

विनयजयः

माप्यतुले त्वं नीचै
र्यासि, मापिकाऽस्ति चेत्तुला लघ्वी ।
नीचैर्योऽसौ गुरुरिह
यस्तूच्चैः सोऽस्ति लघुरेव ॥
विनयजिता जयमाला
विजयजितां स्रजं नित्यमतिशेते ।
म्लानिं कदापि याति न
सदामनोज्ञा सदासुरभिः ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

शुभाशुभपरित्यागी

जगदीश्वरेण रम्यं
जगदिदमस्ति विनिर्मितं सुचारु ।
ज्योतिस्तमःसदसतां
संगमभूतं समं मधुरम् ॥
न किमपि सदाऽनवद्यं
न च किमपि सन्ततमवद्यमेवास्ति ।
सत्यं शिवं च सुन्दर
मखिलं हि विवेकसंयुक्तम् ॥
शिवकृपया स विवेकः
समुदेति सुमानसे स्वयं साक्षात् ।
शुभाशुभा विचिकित्साः
स्वयमस्तं तत्क्षणाद्यान्ति ॥

मनः संघर्षः

यत्रैव यामि मनसः स्ववपुः स्थितस्य
संघर्षमन्यवपुरङ्कमनोभिरीक्षे ।
दृश्यं मनो न मम नापि च तत् परेषां
दृश्यत्वमेति ननु केवलमेष घर्षः ॥
घर्षोऽयमस्ति जनको नियतेः शुभानां
शोभावतां च सुकृतामपि दुष्कृतां च ।
मा भूद्भयं किमपि घर्षविधेरमुष्माद्
उत्तिष्ठ याहि चल विश्वहिते रतः स्याः ॥
दृश्यानि यानि पुरतस्तव भान्ति यान्ति
सर्वाणि तानि पलशः परिवर्त्तवन्ति ।
एषोऽस्ति नित्यपरिवर्त्तनधर्मणोऽस्य
नैकत्ररक्तमनसो मनसः प्रभावः ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्ति भाति

धाता सृजति विचित्राः
सृष्टीरसतीः सतीर्विरुद्धाभाः ।
यथा निर्मितास्तेन
तथैव ता अत्र सन्त्येव ॥
नैवात्र कोऽपि दोषः
पापी चेत् स्वयं पापमाचरति ।
भवेद्यस्य यो धर्मः
स तु तस्य वर्त्तेतामेव ॥
वैषम्यं तु तदैव
यदा स आत्मानमिह निगूहयति ।
बहिर्महात्मा त्वन्तः
कंसः कस्तं क्व संस्कुर्यात् ॥

कनकविषम्

कनकैः क्रीत्वा मूर्त्ति
कनकैः प्रत्यतिष्ठपः सश्रद्धम् ।
कनकमचिरांशुभावं
व्यपगतमधुनाऽर्चयेत्तं कः ॥
विलपति रामः सीता-
लक्ष्मणमारुतिवृतः स किं कुर्यात् ।
कनकेन विप्रलब्धाः
सर्वेऽपि वयं नृलोकश्च ॥
करुणाऽत्यजन्नृलोकं
कनकक्रीतं च कनकनिगृहीतम् ।
कनकमया व्यापारा
वर्धन्ते, पूज्यपूजा क्व ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

'देवराहा बाबा'

जातिप्रेम न दोषाय हेया जातीयता मता ।
प्रान्तप्रेम न दोषाय हेया प्रान्तीयता मता ॥
सम्प्रदायानुरागोऽपि श्लाघ्य एव विपश्चिताम् ।
साम्प्रदायिकता किन्तु महादोषाय कल्पते ॥
इत्यद्योपादिशन् सायं देवराहामहोदयाः ।
वीतरागा महात्मान उदाराः करुणामयाः ॥

(मकरसङ्क्रान्तिः, २०४१वि)

कनकामृतम्

कनकं सुन्दरतायाः
सहचरमिति नैव निन्द्यतां याति ।
तथैव रमणी काम्या
नैवाधिक्षेप्यतां याति ॥
प्रकृतिजनन्या उभयं
सौन्दर्यसमृद्धिमत् सहजकुसुमम् ।
ध्येयं धेयं पोष्यं
नैवात्र च संशयः क्वापि ॥
असुराणां समवाये
बन्दीभूते उभे न रमणीये ।
विषदिग्धे आकृषतो
हतश्च सर्वांस्ततो भ्रान्तान् ॥
आराधयामि मनसा
त्वामिह लक्ष्मीपात्रं परं शुभदम् ।
सुधीभूय मम मन्दिर
मुपेहि वर्धय समानस्मान् ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रार्थना

शापानुग्रहयोस्त्वमेव परमस्वातन्त्र्यभागीश्वरो
जानेऽनुग्रहशक्तिमीश परमां तेऽहैतुकीं शाम्भवीम् ।
हे ब्रह्माण्डनिकायनायक धियो नः सत्पथे प्रेरय
येनानुग्रह एव तेऽस्तु सुलभः क्लिश्नातु शापो न नः ॥
शापोऽपीश तवास्त्यनुग्रह इति प्रोचुर्महापण्डिता
भक्तस्त्वच्चरणारविन्दमधुपोऽतः प्रेक्षते त्वत्कृपाम् ।
सर्वत्रैव सुखेऽपि दुःखनिचये साम्यं भजन् भक्तितो
योगक्षेमपरे स्थिरे त्वयि विभो किं तस्य कुत्राहितम् ॥
बालो बालमतिः कदापि यदि स स्याद् दोषभाक् कुत्रचित्
क्षन्तव्यः स विभो त्वदेकशरणः सानुग्रहं तावकः ।
मर्यादां यदि लौकिकीमनुसरँस्तं दण्डनीयं व्यधा-
भ्तत्रापीश कृपां तथा कुरु यथा न स्याद् दयाभाङ् नृणाम् ॥

उभयोरभ्यासः

सन्तः सरलाः सुधियः
सरलेन पथा मुदा सदा यान्ति ।
विषमवृत्तयोऽसरलाः
सदाऽऽश्रयन्ते विषममार्गम् ॥
असतां शक्तय उदिता
विषमीकुर्वन्ति ताः पथोऽपि सताम् ।
भगवत्कृपया सन्तो
ऽपि समीकुर्वन्ति तान् झटिति ॥
उभयोरभ्यासोऽयं
विलक्षणो मूलतः सदा भिन्नः ।
उभयं संभूय जगत्
सृजति च पाति चापि संहरति ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

हिमालयः

प्रभञ्जन त्वं मरुतां वरः सखे
समाद्रिये त्वां सततं महाबलम् ।
जिगीषसि त्वं यदि मां महामद-
स्तृणाय मन्ये त्वदिषुं हिमालयः ।
अहं तृणं नास्मि न जाङ्गलस्तरुः
कदापि वेगस्तव मां न जेष्यति ।
महान् गिरीन्द्रोऽस्मि हिमालयाभिधो
न कोऽपि माँ चालयितुं च शक्नुयात् ॥
मम प्रभावात्तव वेगरोधनाद्
दिवि त्वमुत्क्षिप्यस एव केवलम् ।
ततश्च सज्जीवनतामुपेयिवान्
प्रमोदयेस्त्वं मम मेदिनीं मुदा ॥

मा कुरु गर्वम्

मा कुरु गर्वं साधो
निजसाधुत्वस्य कुलप्रदत्तस्य ।
अकुलीना इह बहव
स्तव साधुत्वं जिघत्सन्ति ॥
त्वत्साधुत्वादर्शे
विकृतं निजमाननं शुभीकृत्य ।
प्रदर्श्य लोकं मुग्धं
सद्यस्तं ते विलुण्ठन्ति ॥
साधुर्न भव कदाचिद्
भवसि चापि चेन्न साधु दर्शय तत् ।
यदि क्वचिद् दर्शयसे
स्वं रूपं नैव तत् कथय ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अग्निर्म्लानः

साद्यो ! फूत्करणैरलं तदुदितो धूमो न, भस्मैव तद्
यस्तूष्माऽप्यनुभूयते तत इतः सोऽस्ति प्रतापक्षयः ।
अग्निर्म्लानिमुपागतोऽस्ति महिमा तस्यापयातोऽधुना
शीतादुद्विजसे यदि त्वमनलं प्राप्तुं यतस्वान्यतः ॥

गृहपतिः शालीनः

धन्यं जगदिदमास्ते
बहुसंख्यैर्दस्युभिः परीतमिव ।
सुचोरयन्त्यपि सर्वं
ते सतां गृहाद् विनतवेषाः ॥
गृहपतिमधिक्षिपन्त्यपि
"तव सज्जनता नितान्तदुर्बलेति ।
नार्हसि निजगृहवासं
निर्गच्छ द्राग् गृहादस्मात्" ॥
गृहपतिरपि शालीनो
नोत्तरति किमपि दस्युगणान् सरलः ।
नापि त्यजति निजगृहं
निर्लज्जः सन् महाशान्तः ॥

कालमहेश्वर

तपति वर्षति याति पुनः पुन-
श्चलति तिष्ठति शीतयते पुनः ।
परमचञ्चल एष विलक्षणो
जयति कालमहेश्वर ईश्वरः ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

भद्रमेव जयते

न कथय कदाप्यभद्रं
नाभद्रं कुत्रचित् कदापि शृणु ।
सर्वं तव भद्रं स्याद्
व्यवहरतः सर्वतो भद्रम् ॥
दुर्जनवृत्तिं दृष्ट्वा
यदि त्वमपि चरसि दौर्जनीं वृत्तिम् ।
त्यजेत् सुजनता पृथिवीं
भद्रं दृश्येत न क्वापि ॥
भद्रं भद्रं भद्रं
सुजप मनसा वचसा शरीरेण ।
सर्वं दृश्यं श्रव्यं
नचिराद् भद्रं शिवं स्यात्ते ॥

वीणावादिनि

वीणावातननिपुणे
मातरुपवीणय निर्भरं मधुरम् ।
गोमायवश्च काकाः
कार्कश्यं तन्वतां कामम् ॥
कार्कश्यात्तव वीणा
बिभेति कोमला नोचितं त्वेतत् ।
कोऽपि न तामाच्छेत्तुं
प्रभवति काकः शृगालो वा ॥
वरदे वादय वीणां
वीणा ते वस्तुतस्तावकी वीणा ।
जीवतु चिरं मरालः
स वाहकस्तव च वीणायाः ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

रत्नाकरः

जाने न याचसे त्वं
किमपि कुतश्चित् स्वयं सदा पूर्णः ।
तथापि नद्यो जलदाः
स्वयं त्वदङ्के समायान्ति ॥
अप्येषा तव नीति-
र्विपुलसलिलनिधिसमाकलनमूला ।
अथवा स्वयमेवार्था
रत्नाकराङ्के विशन्त्येव ॥
रत्नाकरेतरेषां
चलप्रतिष्ठा अनन्तलिप्सास्ताः ।
रत्नाकरस्त्वलिप्सुः
स्वयमचलप्रतिष्ठतां भजति ॥
अम्भोधे तव शक्ति
गाम्भीर्यं सम्पदं च वेत्ति न कः ।
कथमिह तरङ्गजालै-
रात्मानं त्वं प्रदर्शयसि ॥

सन्धिर्व्यर्थः

जाने तव तस्करतां
व्यर्थं वाग्जालं वक समाश्रयसि ।
अलमिह दम्भैर्धूर्त
हंसोऽहं त्वं तु वक एव ।
वकतामाच्छादयितुं
हंसं मामधिक्षिपन्न जिह्रेषि ।
धिक् त्वां दुर्मुखमूर्खं
सन्धिर्व्यर्थः पिशुनवृत्तैः ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विलपति कुलपति

विलपति कुलपति कुलपति-
रस्मिन्त्सुकुलेऽप्यशुक्लवृत्तिमये ।
विफलैव योगनीति-
र्विफलैव च दण्डनीतिरिति ॥
एष वेद नृपधर्मं
न कुनीतिं कुनृपसद्मवसतिं ताम् ।
वारविलासिन्येषा
नृत्यति सर्वांश्च घूर्णयति ॥
विलसत्यलिन्द एव
वीणापाणिः सती चिदानन्दा ।
अन्तर्विविक्षुरपि सा
वर्कैर्निरुद्धा बहिः शान्ता ॥
कीदृगतीतो गरिमा
सुकुल तवास्तीति वेत्ति को न बुधः ।
प्रत्यागन्ता कथमिह
महिमा तेऽसौ त्वमेव वद !।
लक्ष्यं स्पष्टीकुर्याः
स्या न सुकुल लक्षणेषु बहुमानम् ।
आधत्स्वैव सुरगिरं
त्यजासुरीं गिरं च वृत्तिमपि ॥

जाने त्वाम्

जाने त्वां नहि संशय
आत्तौ क्रीडां परेषामनुभवसि ।
विद्यासंस्कृतिसत्यैः
सम्बन्धं तेऽवगच्छामि ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यत्र चिकित्स्यतां चिकित्सको भजति

कः कं तत्र चिकित्सेद्
यत्र चिकित्स्यतां चिकित्सको भजति ।
समवाये मत्तानां
स्वस्थः कश्चित् कथं निवसेत् ॥
यत्र समेऽप्युन्मत्ता
यत्र चिकित्स्यतां चिकित्सको भजति ।
पलमपि तत्र निवासः
स्वस्थानां क्लेशदः परमः ॥
अथवा स्वस्थोऽपि ततो
ऽस्वस्थ इव व्यवहरेत् समैः साकम् ।
स्वास्थ्ये प्रदर्शिते तु
सर्वेषां कोपभाक् स स्यात् ॥

यदपि विधास्यसि शिवं तत्ते

जगदेवेदं व्यर्थं
व्यर्थाः सर्वाः प्रवृत्तयोऽस्माकम् ।
तथापि धरणौ सर्वं
व्यर्थमपि सत् सार्थकीभवति ॥
सार्थव्यर्थविचारा
आदर्शमये समाज उचिता अपि ।
यत्र मृषाव्यवसाया
एव समेषां ततः किं स्यात् ॥
भगवान् कृष्णोऽप्याह
शुभाशुभौ स्तः सदा परित्याज्यौ ।
भगवत्प्रेरित एधि
यदपि विधास्यसि शिवं तत्ते ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्षितिरेषाऽरण्याणी

क्षितिरेषाऽरण्यानी
कण्टकबहुला च राजपथविरला ।
हिंस्राहिंसाः पशवो
बहवोऽत्र सदैव विहरन्ति ॥
पथिकाः सर्वेऽपि वयं
कदाचिदेव लभामहे वटच्छायाम् ।
अतिदुर्लभाः सुमनसः
पदे पदे कण्टकान्येव ॥

आत्मानमेव शोधय

आत्मानमेव शोधय
परेऽपि तेनैव शोधयिष्यन्ते ।
व्यर्थं व्यग्रोऽन्येषां
त्वमसि शोधनाय हे साधो ॥
अस्ति "महाकम्प्यूटर"
मत्रापि तत्र च सर्वतः सुलभम् ।
तेनात्मानं योजय
साध्यं सिद्धं समेषां स्यात् ॥

क्व को यायात्

दहति दीर्घाहतरणिः
पुलिनमपि तप्तं जनान् दहत्येव ।
छायायामपि तव वट
कण्टकानि चेत् क्व को यायात् ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पर्णकुटी सत्यस्य

सत्यं क्व गतं भगवन्
जयन्ति केवलमसत्यहर्म्याणि ।
पर्णकुटी सत्यस्य
झञ्झावातैः समुद्धूता ॥

न सत्तन्नासदुच्यते

विलक्षणस्त्वं भगवन्
नासीति मनुते नास्तिको लोकः ।
त्वमेव सत्यं नान्यद्
वदति च वेदान्तलोकोऽयम् ॥
अत्र तु नास्ति विवादः
परमे व्योम्नि तवास्ति वसतिः क्वापि ।
कथमेतन्नहि जाने
व्यक्तोऽप्यव्यक्ततां भजसे ।
अकुतोभयस्य भीतिः
कस्मान्नित्येश्वरस्य ते भगवन् ।
व्यक्तीभवसि कथं नहि
भयाकुलानां समक्षं नः ॥
कुत्र मे वसतिरस्ति सुनित्या
कोऽहमित्यपि न वेद्मि यथावत् ।
त्वं न शिक्षयसि नापि च वक्षि
किं न वेत्सि भगवन् मम भाषाम् ॥
सर्ववित् त्वमसि विश्वविलासः
शास्त्रिलोक इह शास्ति तथैव ।
किं तदस्ति निरुणद्धि यदावां
भाषितुं मिथ इहापि ततो वा ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मनसि कृपामाधत्स्व

अलमेभिर्दुर्दम्भै-
मनुज सत्यास्तेयरक्षकम्मन्य ।
स्वयमस्यसत्यसन्धः
सत्यं परितः प्रचारयसि ॥
मनसि कृपामाधत्स्व
कृपयैव सेत्स्यति सर्वमेवात्र ।
यत्र न कृपा, न सत्यं
सत्यं, नास्तेयमस्तेयम् ॥

प्रपञ्चः

उत्तमता यावती तावती जघन्यताऽस्ते ।
जगति सदैव समत्र साम्यनियता प्रथितार्था ।
ध्रुवप्रदेशे षाण्मासिकः प्रकाशोऽस्ति यदि ।
तमोऽपि तावद् विराजते तत इति वेद न कः ॥
समन्वयः परमा गतिरस्ति नृणां मत एव
नहि समन्वयादृते काऽपि सरणिः सुधियामिह
धर्मं चर सत्यं वद वेदानधीष्व चापि
सहस्व चेह यथाजातानपि दुर्धिषणानपि ॥
कः प्रतीपयेज्जगत्प्रवाहान् कृत्स्नान् कथमपि
कोऽनलस्य शीतलयेत् सहजं व्रतमूष्माणम् ।
उद्यापयेद् व्रतं कः पतिव्रतायाः सत्याः
कः प्रतीपयेद् गतीर्ग्रहाणां गगनगामिनाम् ॥
आद्रियस्व साधूनसाधवः सह्यन्तामपि
वन्दस्व विभ्रामन्धंतमसान्यपि सह्यन्ताम् ।
विचक्षणं समुपास्स्व तदितरे सह्यन्तामपि
सुधां गरलमपि दधत् सुखं जीव शतं शरदाम् ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

बहिर्गच्छसि गच्छैव

बहिर्गच्छसि गच्छैव
त्वामत्र निरुणाद्धि कः ।
शिवास्ते सन्तु पन्थानो
जीव्याश्च शरदां शतम् ॥
किन्तु दम्भैरलं तात
सत्यं तुभ्यमलं हि नः
बहिर्गतिर्न कल्पेत
पुरस्काराय ते क्वचित् ॥
बहिर्गत्वा बहिस्तिष्ठ
तूष्णीं संन्यस्य कामनाः ।
वान्तं लिलिक्षसि पुनः
किमाश्चर्यमतः परम ॥

जयति शिशुरयम्

प्रसभमाकृषति रज्ज्वा
ममतामय्या सुदूरधाविन्या ।
मदयति वागनुभावै-
रमन्दशोभैः शिशुश्चपलः ॥
अगोचरायाः प्रकृते-
र्महानयं गोचरः सहजमहिमा ।
प्रकृतेरयमनुभावः
स्वयं समे तं दधत्येव ॥
जयति शिशुरयं शिशुभि-
र्नैकैः सह जगति पावयत्वस्मान् ।
सहजा ममताधाराः
पावनमदिराः प्रवाहयतु ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वपिहि रामकथे

स्वपिहि रामकथे कशिपौ मनाग्
उचित एष तवावसरो नहि ।
शृणु च रावणदुर्वचसां तति
नहि कथे मुखरीभव सम्प्रति ॥
नहि स रावण एधत एकलो
ऽद्य न वसत्यपि स क्वचिदेकतः ।
स हि विभाति बहुष्विह मूर्त्तिषु
प्रतिदिशं स विभातितरां भुवि ॥

कामाख्या

प्रथमावसरे मात-
र्द्वारादपि दूरतः प्रहित एषः ।
अस्मिन् वारे द्वारे
कृपया प्रातिष्ठपः सायम् ॥
नचिरात् पुनर्जननि मम
नयने सिद्धार्थतां कथं यातः ।
तादृशमवसरमुपनय
न कुरु विलम्बं सदयहृदये ॥
हिमालयस्य तनूजे
कैलासपतेः प्राणप्रिये साध्वि ।
किं कामरूपरूपा
ऽप्येवं दुर्दर्शतां यासि ॥
कैलासीयं हैमं
मोहं मातः सानुग्रहं विसृज ।
भवजलधिवक्रनक्रै-
र्ग्रस्तां जनतामनुगृहाण ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सा यद् वाञ्छति तत्तदेव

को जानाति कथं कुतः किमुदियान् निःश्रेयसं वाऽशुभं
सा यद् वाञ्छति तत्तदेव सततं भोग्यायते प्राणिनाम् ।
साऽव्यक्ता तदभीप्सितं च सुतरामव्यक्तगोप्यं पुन-
स्तस्याः सेवनमेव सर्वजगतां श्वःश्रेयसायानद्यम् ॥

नास्थां कदापि जहि

आस्था न चेन्मनुज जीवसि नैव मूढ
जीवन्नपि त्वमसि जीवविहीन एव ।
सद्यो गुरुं प्रणम सज्जनसङ्गतिज्ञ
नास्थां कदापि जहि तत्र हि जीवनं ते ॥

मनोरथौ

मनोरथौ द्विविधौ स्तः
परमनियन्तुः परमनियतस्य च ।
पूर्वः स्वयमुपतिष्ठति
परः समायाति नाप्यथवा ॥
समभ्यर्थनां भूयो
भगवन् कृपयोररीकरोतु द्राक् ।
एकीभवतूभयमपि
त्वद्वाञ्छा स्यान् मदीयाऽपि ।
नाशा नापि निराशा
नानन्दा नाऽपि च वेदना स्तत्र ।
परमशिवानन्देऽस्मिन्
रमेय सततं स्वनिर्मुक्तः ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

धूर्त्ताः

धूर्त्ता एते तेषु न
पलं विश्वसिहि कथमपि हे साधो ।
प्राचीमपि प्रतीची-
मानयन्ति ते कनकचौराः ॥

बालविलसितम्

आकर्षणानि विविधानि वसुन्धरायां
कान्तासुवर्णपदकानि मनो हरन्ति ।
किन्त्वत्र यद्विलसितं सहजं मनोज्ञं
बालस्य तन्मधुरिमा नहि वर्णनीयः ॥

विधिं ययाचे हरिर्हंसम्

द्रष्टुं जननीं गरुडे
गते, ययाचे हरिर्विधिं हंसम् ।
हंसोऽपि सप्रसादं
क्षीरार्णवमाययौ सद्यः ॥
कृतस्य कृत्स्नं क्षीरं
तदनु युगद्वयसमाप्तिवेलायाम् ।
अर्धाधिकाभिरद्भि-
र्मिश्रितमिति दृष्टवान् हंसः ॥
किमसावतिथिः कुर्यात्
केवलमस्यात्र दूयते चेतः ।
नीरक्षीर विवेकं
वहति स तूष्णीं, वहति च पतिम् ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मानव जिह्वा न ते गलति

अधिक्षिपासि सन्निष्ठा-
मधिक्षिपसि सत्यमप्यहिंसां च ।
अधिक्षिपसि मानवतां
मानव जिह्वा न ते गलति ॥
स्वयं तास्करीं वृत्ति
चरसि परेषामधिक्षिपसि करुणाम् ।
धिग् धिङ् मानव नहि ते
बुद्धे स्तुलनाऽन्यतः क्वापि ॥

प्रतिनिशं कवयामि

प्रतिदिशं विचरामि न संशयः
प्रतिपलं प्रलपामि न संशयः ।
प्रतिदिनं विलपामि न संशयः
प्रतिनिशं कवयामि न संशयः ॥

वीक्षै भद्रमभद्रे

सदा भजामि निराशां
नग्नमसज्जगत् पुरः समभिवीक्ष्य ।
यत्र स्वार्थच्छलना
विषललना घ्नन्ति सन्मार्गान् ॥
दृष्टिमेव परिवर्त्तय
भगवन्, सर्वं शिवं यथा वीक्षै ।
सत्यमसत्ये स्वार्थे
ऽस्वार्थं भद्रं तथाऽभद्रे ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रकृतिनटी

किमिति मनो नहि रमते
पल्वलसलिले क्षणं मरालस्य ।
रमते तत एव वको
वराहलोकश्च निर्विघ्नम् ॥
प्रकृतिनटी यद् वाञ्छति
स्वीकुर्वंते तदेव तु पुत्तलिकाः ।
सा चालयति समस्ता
इमा यथाऽस्या अभिनिवेशः ॥
मा भैषीर्जातु सखे
तस्याः पन्था नितान्तनिर्लिप्तः ।
पूजय तां भज चापि
सर्वं मङ्गलमयं स्यात्ते ॥

अध्यात्मं को निषेवेत

कः श्रोष्यति तव वाचं
'नानक' 'तुलसी' 'कबीर' 'गोविन्द' ।
स्वर्णस्य समे दासा
अध्यात्मं को निषेवेत ॥

कुञ्चिका रथगतेः

रथचालक नहि विस्मर
कुञ्चिका स्वरथगतेस्त्वमेवासि ।
सम्यक् स्वं विनियोजय
यथा न दुर्गतः स्यात् स रथः ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नायं मालाकारः

नायं मालाकारो
व्यवसायी पुनरयं तरुच्छेत्ता ।
जलं पातयति मूले
छिदासुखार्थं न सेकाय ॥
नायं विश्वसनीयः
कनकार्थी वस्तुतो, नहि फलार्थी ।
कोऽस्मिन् ममताभावः
को वाऽऽम्रवणीमिमां रक्षेत् ॥

आसुरा विग्रहाः

कश्चित् स्वर्णमृगायते च्छलयितुं रामं प्रियामानदं
कश्चिद्रावणतामुपेत्य जननीं हर्त्तुं तु भिक्षूयति ।
कश्चिद्याति च कंसतां क्षपयितुं बालानबोधान् पुरः
सर्वेऽप्यासुरविग्रहा अविरतं, मन्ये, सतां रोधकाः ॥

पथिकं प्रति

किं चिन्तयसि पथिक रे
छायातरवो न सन्ति मार्गेऽस्मिन् ।
बर्बूरकास्तु बहव-
श्छायाहीनाश्च कण्टबहुलाश्च ॥
ऋतुरपि निदाघ एव
पन्थाश्चातिदीर्घोऽस्ति गन्तव्यः ।
सन्ध्योत्तरं कुहूश्च
कथं स्वकीयगेहे पदं दध्याः ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वन्देऽधवलचरित्रान्

गुणेषु दोषान् भूयो
दोषेषु गुणाँश्च साधु धापयतः ।
वन्देऽधवलचरित्रान्
धवलसुवेषान् वदनमायान् ॥

नेर्ष्यति कुमुदम्

नेर्ष्यति कुमुदं नापि च
रवये क्रुध्यति दिनेषु चाविकसत् ।
निशि तत् सीदति नूनं
चन्द्रोऽपि चेन्न तद् विकासयति ॥

तच्चरणौ शरणं व्रज

जगदम्बा किं वाञ्छति
वेत्सि न, नापि च प्रयतसे वेत्तुम् ।
जानीषे यदि तत् त्वं
तत्त्वं सर्वं विजानासि ॥
काऽपि न तादृग् घटना
यत्र तु मातुः कृपा न दृश्या स्यात् ।
सर्वं मातुः कार्यं
किं व्यर्थैः स्वैरभिनिवेशैः ॥
तच्चरणौ शरणं व्रज
विस्मर सर्वं स्वकीयपरकीयम् ।
क्रीडोत्सङ्गे मातुः
शिवं जपन् निर्विशन् भद्रम् ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पारेविश्वमदृश्यः स्नेहः

जनकस्नेहो बाल्ये
मातुः स्नेहश्च यौवनेऽपहृतः ।
हृतः पितृव्यस्नेहो
ऽपि हृतः स्नेहो गुरूणां च ॥
स्नेहविरहित श्चकमे
ऽव्यक्तस्नेहं शिवं कमपि नित्यम् ।
अलभत चैष जनस्तं
प्रभुकृपया यत्नशून्योऽपि ॥
दुर्ललितः संवृत्तः
तृणाय सकलं च मन्यते दृश्यम् ।
पारेविश्वमदृश्यः
स्नेहः कश्चित् स तं रक्षतु ॥

असन्तोषः

कश्चित् तृप्यति पूजया भगवतो विद्याव्रतानां तथा
कश्चित् केवलमीर्ष्यया गुणिगणे विद्यायशःशालिनि ॥
स्वीयं कोऽपि न तृप्यतीह सकलं दत्त्वाऽपि सौभाग्यवान्
आच्छिन्दन्नपि सर्वमेव गुणिनां कश्चिन्न सन्तुष्यति ॥

लज्जा कुतः

लज्जा कुतो व्यपगता क्व गतं भयं च
धर्मः कुतोऽस्ति पिहितः सकलो गुहायाम् ।
स्वर्णार्थिनो विगतभीतय अन्धलज्जा
सर्वं बलादपहरन्ति च जाग्रतीह ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुण्यं वद

चर्चास्ता हिंसानां
हिंसातोऽप्यतितरां भीषणाः सन्ति ।
हिंसा नश्यति तत्क्षण-
मस्याश्चर्चास्तु बिभ्रतीमां ताः ॥
पतञ्जलेरुपदेशः
शिरसा धार्योऽत एव नागरिकैः ।
मा वादीस्त्वमपुण्यं
सुतरां तदुपेक्षणीयं ते ॥
पुण्यं वद सत्यं वद
मा वादीः क्वापि कदाप्यसत्यमिह ।
नहि जहि कमपि कदाचित्
सर्वेषां मित्रतां याहि ॥

पठ समरसतां योगिन्

पठ समरसतां योगिन्
पर्णकुटीरे भृशं स्वकीयेऽस्मिन् ।
जगति तु सर्वत एव
विराजते सा विषमरसता ॥
जगति तस्करा निविडे
तमसि विलुण्ठन्ति कस्यचित् सर्वम् ।
उषसि गृहपतिमुपेत्य
तमेव दोषस्य भाजनं ब्रुवते ॥
परिकर्मकथा व्यर्था
व्यर्थाश्च जगति यमनियमादिकथाः ।
अत्र तु कोपविजिह्मं
मुखं च शस्त्राणि सेब्यानि ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

किंशुकं प्रति

कस्त्वां न वेत्ति किंशुक
निर्गन्धस्त्वं बहिर्मनोज्ञोऽसि ।
अन्तर्बहिश्च रम्यं
तथापि कमलं कथं हससि ॥
धरणौ स्थितो दृढायाम्
अमृदुविटपेषु विकसन् पलाशस्य ।
जलजमुपहसन् मृदुलं
न लज्जसे, सर्वमाश्चर्यम् ॥

पवन सदागतिरेधि

पवन सदागतिरेधि
वाहि च याहि च दिशासु सर्वासु ।
ऊष्मणि भवेस्त्वमुष्णः
शीते शीतः सुरभिसुरभिः ॥
स्पर्श एव तव धर्मः
सर्वेऽप्यन्य औपाधिका भेदाः ।
सुखयसि गमयसि सर्वान्
नमो नमस्ते पवनदेव ॥

परिणयः

परिणयः सहजं व्रतमस्ति नः
परिणयेन विना न सुखं क्वचित् ।
कमलिनी रविणा रविरप्यहो
लसति भाति तया परिणीतया ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कोऽसौ प्रयोगशाला

कोऽसौ प्रयोगशाला
ऽस्माकमपरिचिता विलक्षणा क्वापि ।
पुनः पुनर्नवसर्गा
यतो विचित्राः समायान्ति ॥
लथोः प्रतिनिधेः सर्गः
शनैः शनैरलक्ष्यवृद्धिमाप्नोति ।
वृद्धौ पूर्णायां सति
स्वयं स्वयन्त्रालयं याति ॥
वेत्ति न कश्चन वृद्धिं
वृद्धं स्वं तदनु वीक्षतेमात्रम् ।
अलङ्घ्यगम्यं यानं
कालस्यारुह्य वर्त्ततेमात्रम् ॥

अहमेव महान्

अहमेव महान् न कोऽपि मा-
मतिशेते वसुधातले जनः ।
इति चेत्तव भावनाहृदि
त्वदृतेऽल्पज्ञ इहास्ति कोऽपि नो ॥
लघुरेव महाभवाम्बुधे-
र्ननु बिन्दुस्त्वमसीति विस्मरन् ।
अभिमानवशंवदो मृषा
गुरुणा स्वं लघु तोलयस्यहो ॥
तुलयोपरि बिभ्रतं निजं
नहि मन्यस्व महान्तमञ्जसा ।
गुरुरेव भुवं स्पृशेल्लघुः
पुनरुच्चैर्गगने हि लम्बते ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कनिष्क हा हन्त गतः कुतः क्षणात्

हे कनिष्क गगने चरन् मुदा
यात्रिणो वहसि दूरतः क्षणात् ।
बालपृद्धतरुणाः समे समं
त्वन्निवासमुदिताश्च यान्ति ते ॥
चालकोऽस्ति सवितोपमो महान्
आतिथेय्यपि सखी सुलोचना ।
वायुगीतमपि गायसि स्वयं
मेलयस्यपि बहून् बहूद्यमैः ॥
किन्तु दैत्यनिवहः प्रपञ्चकः
त्वां क्षणाद्दुरवधीत् स दुर्मतिः ।
त्वन्निवासमुदिताँश्च यात्रिणो
कालनीरनिवहे न्यमज्जयत् ॥
हे कनिष्क नहि काचन व्यथा
त्वं छलेन जलधौ निपातितः ।
चिन्त्यमेतदिह केवलं सतां
मानवत्वममलं हतं खलैः ॥
क्वाद्य शूलभृदसौ महेश्वरः
क्वाद्य राम इह रावणान्तकः ।
क्वाद्य कृष्ण इह कंसमर्दनः
क्वाद्य शुम्भमहिपार्दिनी शिवा ॥

यत्र न करुणा

यत्र न करुणाममते
केवलमीर्ष्याद्वेषाः प्ररोहन्ति ।
नियमाधिनियमचर्चा-
स्तत्र व्यर्था, ग सन्देहः ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

शैवी शक्तिः

तादृगस्ति नहि किञ्चन तत्त्वं
यत्र कश्चन भवेन्न विरोधः ।
एकमेव शिवतत्त्वमिहास्ते
यत्र सर्वमनुरोधकमेव ॥
शक्तिरस्ति महिता किल शैवी
या सृजत्यवति हन्ति च विश्वम् ।
तत्कृपाजनितमेव च विश्वं
तत्कृपापरिणतिर्ननु मुक्तौ ॥
तामुपास्स्व तदनुग्रहेण च
भुङ्क्ष्व सर्वमिह चामुतो मुदा ।
नास्ति किञ्चिदपि दुर्लभं तव
सर्वमङ्गलमयं समं तव ॥
किं विचिन्तयसि सैव विचिन्त्या
किं चिकीर्षसि भजैव मृडानीम् ।
किं पिपाससि सुधां पिब शैवीं
या सुधीकुरुत आशु विषाणि ॥
दृश्यतां समुपगच्छति नो वा
सैव दृश्यमखिलं विनियुङ्क्ते ।
वेत्ति नाम नहि कश्चिदमुष्याः
सैव भद्रमखिलं वितनोति ॥

जागृहि कविते

जागृहि कविते जागृहि
स्वपिहि न, पश्य, सूर्योदयो जातः ।
सुमनस इमाः सलिलजा
एनं परितः प्रतीक्षन्ते ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

उल्लसन्तीषु तासु
कोऽन्य ऋते त्वां सुचित्रयेद् रम्यम् ।
सुन्दरताऽमरलतिकां
कोऽन्यः सिञ्चेत् सुधासाराम् ॥
जागृहि कविते जागृहि
पश्य चित्रय तं हलधरं कृषकम् ।
वसुधास्तनन्धयो यः
सर्वं धान्यैः प्रपूरयति ॥
जागृहि कविते जागृहि
शृणु वेदाध्यायमृषभस्वरमुषसि ।
आवाहयतो देवान्
सुचित्रय च वैदिकानेतान् ॥
पश्य च सर्वानेतान्
आदर्शार्थं जुह्वतो यथार्थम् ।
जुह्वत आदर्शमपि
यथार्थपूर्त्यै स्वयं कांश्चित् ॥
अश्रुतमपि विद्वांस-
मतपस्यन्तं मुनिं भ्रमणशीलम् ।
स्वच्छन्दामपि साध्वीं
कविते पश्य च सुचित्रय च ॥
बालास्तरुणा वृद्धाः
सकला अपि कौमुदीं दिदृक्षन्ते !
दृष्ट्वा समुल्लसन्ति च
हेतुरिन्दुकौशलं तत्र ॥
उपलरेणुकणैः परितो वृतं
तदिदमिन्दुतलं नहि सुन्दरम् ।
तदपि कौशलमस्य विविच्यतां
किरति दूरत एष करान् मुदाम् ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

परमशिवः

एकोऽपि स बहुरूपो
बहुरूपोऽपि च स एक एवास्ति ।
अक्षय्यः परमनिधिः
परमशिवः स समरसो जयति ॥
तादृक् किमपि न तत्त्वं
यन्न तदीयं न वाऽपि तत्स्थं स्यात् ।
शिवं सुन्दरं सत्यं
तदेकमेवाद्वितीयं चित् ॥
असदपि सदपि च शून्यं
सर्वमशून्यीकरोति बिभुरेषः ।
सविषोऽपि सुधासिन्धुः
परमशिवः स समरसो जयति ॥

अनुवर्त्तनम्

कश्चिद्याति कुतोऽपिचेत्
परिजनोऽन्वेत्येव तं दूरतः
नैषा जीवनमात्रसीमितकथा
नृणां स्वभाजां पुनः ।
जीवस्यापगमेऽपि सन्तति-
गणो यात्येव गात्रं वहन्
यावद् भस्मचयीभवेन्नरवपु-
स्तावत् कथेयं ध्रुवा ॥
दिवोऽपि यात्री मनुजः
पृथिवीं द्रष्टुं यदा समायाति ।
मन्ये, केचिद् देवा
असुरा वा तमनुवर्त्तन्ते ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

दौर्जन्यनिदानम्

दौर्जन्यस्य निदानं
तथा चिकित्सामस्य प्रवक्ष्यामि ।
अस्य निदानमुपेक्षा
तथा चिकित्साऽप्युपेक्षैव ॥
न जनिष्यति दौर्जन्यं
पित्रोर्यदि नहि सुत उपेक्षितः स्यात् ।
सति संस्कारे कथमपि
न दुर्जनः क्वापि समुदेति ॥
व्याधिर्दौर्जन्यस्य
द्वेषेण नापि घृणया शमनमेति ।
उपेक्षयाऽमृतवल्ल्या
सद्यः शाम्येदयं व्याधिः ॥

अचूचुरन्नव्यनवनीतम्

सहजा प्रवृत्तिरेषा
स्तेयाह्वा नराणां समस्तानाम् ।
षोडशकलः स भगवान्
अचूचुरन्नव्यनवनीतम् ॥
गृहे गृहे नवनीता-
न्येवं सुलभानि तानि भूयासुः ।
एवंविधाश्च चौरा
दुर्ललिता अत्र राजन्ताम् ॥
साम्पन्निकास्तु नैवं
सात्त्विकचौर्ये पुनः प्रवर्त्तन्ते ।
सर्वस्वं सर्वेषां
तेषां चौर्याधिकारेऽस्ति ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

शुभाशंसनम्

सर्वेभ्यो जननी ददातु
वसुधा धान्यं धनं सम्पदं
वस्त्रं सद्म च भेषजं च
सुहितं नीरं च वायुं तथा ।
सोहार्दं सुमतिं विनीति
मपि च द्यौर्यच्छतु प्रीतये ।
सर्वे चात्र भजन्तु वीत
विषमाः साम्यं परं बिभ्रतः ॥
न स्वामी न च दासो
नातिविपन्नो न चाति सम्पन्नः ।
परस्पराश्रयभाजः
सर्वे सर्वत्र मोदन्ताम् ॥

शिव एव

शिव एव समा लीला
न तु लीलायां शिवो वसति नित्यम् ।
तस्मिन् सर्वं पश्यतु
लीलाः सर्वा हि तत्रैव ॥
शिवलीलार्णववीचि—
प्रचयेषु भवान् मुदा निमग्नश्चेत् ।
अपरिगणितरत्नानां
भूयादाकरो भवानेव ॥
नटो भवानपि तस्य
नटराजस्य सवितुश्च लीलानाम् ।
नृत्यतु खेलतु पश्यतु
लीलास्तस्यैव तस्य भवान् ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

हालिकं वन्दे

शीतकव्यजनवातशीतले
सास्त्रयामिकनियन्त्रितागते ।
मन्दिरे समुपविश्य हालिकं
ग्रीष्मधूलिचरणं न निन्दतु ॥
भोजनं न कृतवान् सुनिर्भरं
नाप्यपोऽपिबदसौ यथासुखम् ।
क्षेत्रपाललगुडाननुस्मरन्
प्रातरेव सहलः समाययौ ॥
मूर्ध्नि चण्डरविरश्मितापितः
पादयोश्च परितप्तधूलिमाक् ।
सोऽसहाय इह पुंगवायते
तं कथं परिवदन्न लज्जसे ॥
संयुनक्ति वृषभौ हलीषया
सन्दधाति करयोः स फालकम् ।
द्वौ पुरो गमयितुं समुत्सुकः
पीडयत्यपि स पाणिपादकम् ॥
तस्य नास्ति किमपि प्रयोजनं
किं ददाति वसुधा हलेरिता ।
जायते यदपि तत्र तस्य नो
क्षेत्रपालतनयस्य तत् समम् ॥
जायते यदि न तत्र किञ्चन
दोषभाङ् न कथमप्यसौ जनः ।
देव एव गगनेऽथवा भुवि
तत्र कारणमसौ न हालिकः ॥
वेत्त्यसौ हलधरासुमेलनं
वेत्त्यसौ वृषभयोर्गुणान्त्समान् ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नैव वेत्ति स किमप्यतः परं
निन्दतस्तमिह नास्ति ते त्रपा ॥
उन्मदा महिषशूकरा यदि
तस्करा दुरभिषन्धयः खलाः ।
नाशयन्ति नवधान्यसम्पदं
हालिकस्य किमिहास्ति दूषणम् ॥
हालिको न कथमप्यमानभाग्
वन्द्यतां स वसुधास्तनन्धयः ।
वन्दते य इह तं स वन्दते
वस्तुतो हि जननीं वसुन्धराम् ॥

वैलक्षण्यन्

प्रकृतिरभिलषति "सर्वे
सा यद् दर्शयति तदेव पश्यन्तु ।"
तथैव पशवस्तरवो
लताश्च, मन्ये, दिदृक्षन्ते ॥
किन्तु विचित्रः प्राणी
मानव एष विस्मरति सीमां स्वाम् ।
दिदृक्षतेऽसौ सर्वं
दृश्यं तच्स्याददृश्यं वा ॥
तदेव वैलक्षण्यं
कदाचिदेनं नु दैवतीकुरुते ।
लिप्सापरपर्यायं
तदेव तं दानवीकुरुते ॥

अनुकम्पा भागवती

भागवतीमनुकम्पा-
मनुभव ददतीं प्रतिक्षणं भव्यम् ॥
धर्मार्थकामधेनुं
मुक्तिप्राणां शिवमयीं ताम् ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

खण्डा अपि पूज्यास्ते

खण्डोऽप्यखण्ड एव
देशस्य वा कालस्य पात्रस्य ।
खण्डाः सर्वे पूज्या
निदानभूता अखण्डस्य ॥

प्राणिमि गोर्वाणगिरा

प्राणिभि गीर्वाणगिरा
श्वसिमि च गोर्वाणगिरैव शिवमय्या ।
सा गैर्वाणी सकलं
लोकं गङ्गेव विमलयतु ॥

ताम्बूलमहिमा

अन्तः संज्ञानि न वा
सन्ति सर्वाणि पत्राणि हरितानि ।
न वेद्मि यन्त्राभावा—
द्विज्ञानस्यापरिचयाच्च ॥
किन्तु ताम्बूलपत्रं
हरितं वा पाण्डुरं च पीतं वा ।
सपूगरवादिरचूर्णं
सतमालं चेतनं नूनम् ॥
आधिं शमयति सद्यो
व्याधींश्च सपदि समान् विस्मारयति ।
स्फूर्तिं जनयति नूत्नां
तदिदं पत्रोत्तमं प्रकृतेः ॥
चूर्णं सत्त्वं खादिरं राजसं च
तम्बाकू तामसं तत्र तत्त्वम् ।
एते सर्वे यत्र ताम्बूलपत्रे
तत्र स्वर्गस्तत्र मोक्षोऽपि सद्यः ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

न त्वं त्यक्ष्यसि

न त्वं त्यक्ष्यसि मां कदापि भगव-
न्नित्याशया भावितो
मन्ये कृत्स्नमिमं तृणाय निचयं
दृर्वृत्तदुर्मेधसाम् ।
किं कुर्यां नहि वेद्मि कुत्र
जगतामीशो वसत्येकलः
स्याच्चेदेष न दुर्लभः स्वयमहं
दृष्ट्वैव तं स्यां कृती ॥

शुष्को मनुजलोकः

ऋते मनोः सूनुभ्यो
लोकः सर्वोऽनुवर्त्तते प्रकृतिम् ।
प्रकृतिहितास्ते हरिता
मानवलोकस्तु शुष्क एवास्ति ॥

को जानाति

को जानाति कदा कथं विधिरसौ
स्वच्छन्दलीलाधरः
कस्मै किं फलमादिशेत् सुमधुरं
तीक्ष्णं कषायं कटु ।
आसीनः क्वचिदेष तत्र गगने
तूष्णीं समेषां समा
वृत्तीः पश्यति निर्दिशत्यपि
जनुर्वृद्धीस्तथाऽन्तं स्वयम् ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिवोऽहम्

प्रातर्भजामि शिबमेकमनेंकरूपं
सायं भजामि शिवमेकमनेंकरूपम् ।
रात्रौ भजामि शिवमेकमनेकरूपम्
सोऽहं शिबः किमपि नेतरदत्र वीक्षे ।।
शिवः परमशङ्करः
स्वयं तव विभुः प्रभुः ।
तमेव सकलात्मना
भजानुपलमव्यथः ।।
स्वयं स करुणाकरो
दुरभिषन्धिपङ्केष्वपि ।
सुकृतपङ्कजोत्पादने
पटुः परम आश्रयः ।।

महा "सोप"म्

मलिनीकृतं सुवसनं
सद्यः "सोपेन" निर्मलीभवति ।
किं तद्येन मनो नः
समलं विमलीभवेत् सद्यः ।।
पतञ्जलेरुपदेशः
सुदुर्गमश्चिरेण सिद्धिफलवाश्च ।
यज्ञविधानान्यपि नः
प्रचुरार्थकालव्यपेक्षाणि ।।
परमात्मनि मूर्त्ते वाऽमूर्त्ते
तस्मिन् प्रभौ महा"सोपे" ।
अर्पितमेतत् स्वान्तं
समलं विमली भवति सद्यः ।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिवशुकः

स्वयं ब्रवीषि सुहृद्वर
"शिवस्य सुलभः प्रियः शुको वर्त्ते"।
का चिन्ता तव वन्धो
यदि कश्चित्त्वां प्रतिब्रूयात् ॥
अनुवदनं धर्मस्ते
रमय समस्तं लोकमनुवदनेन।
तव नहि किमपि गुरुत्वं
शिवस्य सर्वं नटेशस्य ॥
अनुवद नृत्य च गाय च
शिवस्य परमः प्रियस्त्वमभिनेतः।
शृङ्गारो वीरो वा
वीभत्सो वा तवास्ति किमिह ॥

पलायस्व

पथिक न तेऽत्राबासः
स्थायी कथमपि दिनत्रयावधिकः।
रागः को द्वेषः कः
सौहार्दमुदं कथं त्यजसि ?
स्मितपूर्वं वद सौम्यं
मनुजवदत्र तु व्यवहराविरतम्।
स्थायी यत्रावासः
तत्र यथेच्छसि तथा याहि ॥
नहि मम काचन चिन्त
कथं त्वमत्र किं विधास्यसि बा।
मम चिन्तैका वन्धो
त्वं शीघ्रमितः पलायस्व ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

चालय धर्मरथं स्वम्

सर्वं सेत्स्यति नचिराद्
भगवत्कृपया सतां स्वयं साध्यम् ।
सर्वेऽसदभिनिवेशा
अस्तं सद्यो गमिष्यन्ति ।।
न भवति यः स इहासन्
सन्तं मनुषे च कथमसन्तममुम् ।
भगवानपि गीतायां
भावित्वं नासतां शास्ति ।।
चालय धर्मरथं स्वं
यन्तरसदभिनिवेशानविगणय्य ।
त्वमेधि सततं विजयी
मा भूर्भीतोऽथवा व्यग्रः ।।

स्वेदाम्बुभिः तर्पणम्

आडम्बरैः किमिह सेत्स्यति वोऽसदर्थै-
र्व्यर्थं विकारयथ वाचमतीत्य सत्यम् ।
तूष्णीं गृहं व्रजत हालिकतां भजध्वं
स्वेदाम्बुभिः कुरुत तर्पणमस्तवैराः ।।

नगराज

धैर्यच्युति र्न नगराज तवोचितास्ति
शक्तेः पिताऽसि महितः श्वशुरश्च शम्भोः ।
आयान्तु यान्तु शतशो मरुतां प्रवेगाः
त्वं स्याः सदाऽचलधृतिर्हिमशीतलश्च ।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्षुरस्य धारा

विचित्रमेतज्जगतः कथानकं
न कोऽपि मार्गः सरलोऽत्र दृश्यते ।
तथाऽपि सर्वे समयप्रचोदिता-
श्चलन्ति यान्त्येव सदैव सर्नतः ॥
"क्षुरस्य धारा निशिता दुरत्यया"
सुयानदुर्यानवतां समा भुवि ।
सुयानगैः सन्मतिपाटलीकृता ।
परैस्तु रक्ताविलतां कुधापिता ॥

क्वासो साकेतः

क्व गतोऽसौ साकेतः
क्व च मिथिला क्वात्र नैमिषारण्यम् ।
मुनयो वा राजान
आचारि तपः समैर्यत्र ॥

कर्ण वदान्यश्रेष्ठ

कर्ण वदान्यश्रेष्ठ
न वदान्यता ते हिताय लोकस्य ।
त्वामनुसृत्यैव जनाः
शत्रुभ्यः स्वमर्पयिष्यन्ति ॥

करुणामेव दुर्हससि

वीक्ष्य त्वाँ निपतन्तं
पिच्छिलभूमौ भवामि करुणार्द्रः ।
त्वं त्वेतावान् कुशलो
मम करुणामेव दुर्हससि ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

धाम शाश्वतम्

कथमिदं कवयः परिवर्त्तनं
नवलसुन्दरताश्रयि मन्वते ।
यदि सनातनता न विराजते
क्षणिकसुन्दरता भर एव नः ॥
क्षणिकताऽपि सदाश्रमयमन्तरा
क्षणमपीह न जीवितुमर्हति ।
यदि न सत्यधृतिः समतामयी
न ममता न शिवं न च सुन्दरम् ॥
क्षणिकता भ्रम एव मनीषिणां
निखिलतां च सनातनतां भज ।
क्षणविवर्त्तपरात् खलु जीवनान्
मरणमेव परं हि सनातनम् ॥

धन्यस्त्वं हे नारद

धन्यस्त्वं हे नारद
समीर इव चरसि दिक्षु सर्वासु ।
सर्वं स्पृशसि तथापि
स्पृश्यसे न कदापि केनापि ॥
साक्षात्करोषि सर्वं
साक्षादनुभवसि च सर्वमेवात्र ।
विनिवेदयसे सर्वं
नारायणाय लोककल्याणाय ।
अर्पितसर्वस्वस्त्वं
भक्तः परमो नारायणस्यासि ।
मलिनैः सह निवसन्नपि
सरलः स्वच्छो महांश्चासि ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूपायनो भव

मन्ये तवापि चिन्ता
कथं न दृश्यै दृश्येन केनापि ।
तथाप्यदृश्यप्रवर
प्रदर्शयस्वेव रूपं स्वम् ॥
अवलोकन्ते केचन
सहृदयाः श्रद्धया त्वां सततमेव ।
अपि ते नयनविहीनाः—
स्त्वां पश्यन्त्येव पश्यन्ति ॥
सर्वशक्तिभन्नधुना
त्यज तं निजमदृश्यताभिनिवेशम् ।
सूपायनो भव सदा
परमपिता नस्तनूजानाम् ॥

स्मर स्मरारिम

किमिति न पश्यसि साधो
महिमानं तं महाऽऽदिदेवस्य ।
यदप्यसिद्धं सद्यः
सिद्धं तद् बोभवीत्येव ॥
जगति सर्वत्र शङ्का
द्वेषा लोभाः कामाश्च मोहाश्च ।
नहि तत्र किमपि तत्त्वं
विस्मर सर्वं प्रयत्नेन ॥
स्मर स्मरारेश्चरणं
विस्मर भीतीस्तथा जगन्मोहान् ।
सर्वं शान्तं शुद्धं
स्मयं भवेत्तत्र नो शङ्का ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्रिविधं स्वरूपं

कश्चित् काचित् किञ्चित्
त्रिविधं स्वरूपमस्त्यस्य विश्वस्य ।
प्राणी सकलस्तस्मि—
स्तस्यां तस्मिश्च बद्धोऽस्ति ॥

क्व गता महर्षयस्ते

क्व गता महर्षयस्ते
सहजकरुणयाऽऽप्तसर्वविज्ञानाः ।
रागद्वेषवियुक्ताः
सुहृदो विश्वस्य विश्वस्य ॥
ऋषयोऽधुनातनास्तु
सर्वस्वं तेऽपहारमपहारम् ।
किञ्चिददत्त्वाऽपि पुन-
र्वदान्यतां स्वां प्रकथयन्ति ॥

किं कुर्वीत मनस्वी

किं कुर्वीत मनस्वी
समवायेऽस्मिन्नसत्यसन्धानाम् ?
गर्जति तस्मिन्त्सर्वे
वर्षन्ति विषाणि सद्धाम्नि ॥
तस्यामृतं न वर्षति
गर्जति तस्मिन् कृपासुधासारे ।
तूष्णीमेव कदाचित्
किरति स आनन्दपीयूषम् ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

शूलिन् नमो नमस्ते

शूलिन् नमो नमस्ते
त्वमसि महेशः शिवो महादेवः ।
पश्यसि सर्वं तूष्णीं
तृतीयनेत्रं न चोन्मिषसि ।।
तव त्रिशूली हस्ते
भाले च विराजते त्रिनेत्री ते ।
दुर्जनदुरभिनिवेशा—
स्तथापि परितः समेधन्ते ।।
पश्य पश्य शिव सर्वं
रक्ष रक्ष च तीर्थं निजावासम् ।
आवश्यकमिदमधुना
प्रयुङ्क्ष्व सद्यो निजामुभयीम् ।।

महानायकः

सत्यं ब्रवीमि साधो
त्वमसि जनपदस्यास्य महान् नेता ।
तूष्णीं दहसि कुटीरं
शमयितुमग्निं समायासि ।।

अप्रतिग्रहीता

विचलति नादर्शात् कः
स्वार्थग्रस्तश्च शोषितो जन्तुः
अप्रतिग्रही स्वयमपि
'टिप्'-दाने हर्षमनुभवति ।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ददासि यत्तदेव ते

सिषेविषा नास्ति न चापि दित्सा
स्वान्ते न चेदस्ति शुभा चिकीर्षा ।
तज्जीवनं व्यर्थमिहाप्यमुत्र
मृत्युर्गरीयांस्तत आत्महीनात् ॥
ददासि यत्तदेव ते
परिग्रहो न तावकः ।
अतः समस्त जीवनं
प्रदेहि लोकवृद्धये ॥
न तत्र विघ्नभङ्गिमा
न सद्विपर्ययस्ततः ।
शिवस्ततैव मङ्गलं
तनोति दानशालिनाम् ॥

रे रे वायस

रे से वायस सावधानमानसा मित्र क्षणं श्रूयतां
श्येनाः सन्ति सहस्रशो भुवि तले मैत्रीममीभिः कुरु ।
किन्त्वेताः कलकालीरसभृतः सन्त्याम्रशाखारमा
कृष्णाः कोकिलपङ्क्तयो नहि सखे सख्यं तवाऽऽभिः सह ॥

स्वामी चेन्मम भगवान्

स्वामी चेन्मम भगवान्
कृष्णो रामः शिवोऽथवा देवी ।
किं नहि ममाल्ति सुलभं
विश्वं कृत्स्नं हि मत्करयोः ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

किमपि न कुर्वे वहाम्येव

किमपि न कुर्वे गङ्गा
जङ्गमवेगा नगेन्द्रनिःस्यूता ।
ऋजुरनृजुर्वा मार्गो
वहामि याम्येव पाथोधिम् ॥
मध्येमार्गं सरितः
परः शताः समायान्ति शरणं मे ।
ता अपि वहामि तूष्णीं
चलामि याम्येव पाथोधिम् ॥
क्रुध्यन्तीमाः परिरवा
मह्यं नाहं समाद्रिये ता इति ।
सङ्गमपराङ्मुखीस्ताः
कथमभिनन्दानि गङ्गाऽहम् ॥
क्रुद्धाः कदापि तास्ताः
क्षिपन्ति मूत्राणि मलानि मन्मूर्ध्नि ।
सर्वंसहाङ्कशय्या
तदपि सहर्षं सहे तूष्णीम् ॥

महात्मा विषं वमति

कठिनीभवति मृदुलमपि
नवनीतं वह्नेरधिकतापेन ।
चन्दनतरुरपि घर्षा—
द्वमति कृशानुं बनं दहति ॥
अति मृदुलः सत्पुरुषो
दुर्जनयूथेन तापितो भूरि।
विषपानपरोऽपि पुनः
सपदि महात्मा विषं वमति ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

लाभः

यल्लभ्यते तदिह भुङ्क्ष्व सुधीरचेता
लभ्यं यदस्ति तदवाप्तुमरं यतस्व ।
यन्नास्ति लभ्यमथवा तव योग्यता नो
नेक्षस्व तत् पलमपि प्रतिभायशस्विन् ॥

"मुण्डे मुण्डे" ब्रह्माण्डम्

विश्वं विश्वं विलसति
व्यक्तौ न चात्र सन्देहः ।
व्यक्तिश्चेत् सन्तुलिता
सन्तुलितं स्यात् समं विश्वम् ॥

ज्ञायतां शैली

ज्ञानलवदुर्विदग्धो
रचयति यत्र मायामयीर्भित्तीः ।
न तत्र वाग् भूतार्था
हितदा, मौनं महापथ्यम् ॥
मायाविनाममीषां
मायाभिर्भूतलं समाक्रान्तम् ।
लिप्सव एते कृत्स्नां
वसुन्धरां, नात्र सन्देहः ॥
एभिः कथमालाप्यं
का भाषा तेषु काऽस्ति वा शैली ।
तैरालापात् पूर्वं
ज्ञेये भाषा च शैली च ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

आसुरी माया

अन्तर्लुब्धतमा बही रघुपतेः साक्षादिमा मूर्त्तय-
श्चौर्याचारविचारभारनिरता माधुर्यजिह्वव्रताः ।
आदर्शान् ब्रुवते तथा, सम इहान्ये तस्कराः स्युर्यथा-
धिक् ता दम्भमयीर्नराकृतिमयीर्मायास्तता आसुरीः ॥

पुच्छं प्रचालयसि

पुच्छं प्रचालयसि कुक्कुर भूरि जिह्वां
सर्वान् प्रदर्शयसि किञ्चिदवाप्तुमन्नम् ।
नेदं तवास्त्यनुचितं व्यवहारजातं
धर्मोऽयमस्ति तव जातिगतः पुराणः ॥
किन्त्वेष तेऽभिनिवेश इहातिचिन्त्यो
यत्त्वं मृगेन्द्रसमतां भजितुं प्रवृत्तः ।
नो याच्ञयाऽपितु स केवलमात्मशक्त्या
ऽरण्यं मृगाँश्च गवयाँश्च गजाँश्च शास्ति ॥

निर्घातसमीरणा

पूर्णे चन्द्रे दर्शे
जलधे तरङ्गायितो भवसितराम् ।
उभयोरप्यवसरयो-
स्तवैष महिमा सुदर्शो नः ॥
यदा तु निर्घातस्त्वा-
मुद्वेलयति च जगद्विनाशयति ।
तद् दृश्यं त्विह कश्चित्
कदाचिदेवेक्षितुं शक्तः ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

राज्ञः काऽऽवश्यकता

राज्ञः काऽऽवश्यकता
प्रजाः समस्ता यदि प्रबुद्धाः स्युः ।
राज्ञः काऽऽवश्यकता
प्रजाः समस्ता यदि प्रसन्नाः स्युः ॥
राज्ञः काऽऽवश्यकता
प्रजाः समस्ता यदि प्रमूढाः स्युः ।
राज्ञः काऽऽवश्यकता
प्रजाः समस्ता यदि प्रमत्ताः स्युः ॥

परिचरति समाजं निष्ठया चेत् सदात्मा
न स भजति समेषामादरं मौनसेवः ।
चलति स पदमेकं दर्शयन् षट् पदानि
यदि सदसति बिभ्रत्तस्य सर्वेऽत्र दासाः ॥
वरमिह सकलाः स्युः सज्जना आत्मशिष्टा
नहि नृपति रिहास्तां नापि राज्यं तदीयम् ।
पवन इव गतिज्ञः स्यात् स्वयं सर्वलोकः
समरसचरणा स्यान् मेदिनी भूतधात्री ॥
अपगत इह लोको दाम्भिकानां स्वयं स्याद्
उपकृतिविषदिग्धा दुर्व्यवस्था विनश्येत् ।
अनुचरपरिचर्या दासराजत्वभावा
विषमधरणिभूता देदनानां समासाम् ॥

गुणप्रकाशनम्

न पङ्कजं वेत्ति कथं तदात्मनो
गुणान् जगत्यां वचसा प्रकाशयेत् ।
स्वयं द्विरेफा गुणगुञ्जनक्रमा
वितन्वते सादरमस्य सौरभम् ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मराल कीदृङ् मोहः

अलमेभिर्प्यामोहैः
पलमपि मराल नाधुनाऽत्र निवस ।
दुर्मानसं सर इदं
वराहघोणाविलं परितः ॥
क्वचिद् दर्दुराः क्वचिदपि
काका वकाश्च महिषा मलिनयन्ति ।
न शारदा नापि विधिः
कदाचिदेतत् समुपयाति ॥
पूर्वमेव कमलवनं
ध्वस्तं बहुभिर्बुभुक्षितैः पशुभिः ।
किमत्र तव तत् काम्यं
यदर्थमत्रासि संसक्तः ॥

विवेकदृक्

यथा यदस्तीह न तथा तदुच्यतां
यथा विधेयं न तथा विधीयताम् ।
यथामनीषं न मुखात् प्रसार्यतां
यथेप्सितं नैव कदापि लभ्यताम् ॥
चतुर्भिरेतैरवगुण्ठनैर्वृतो
यदि त्वमन्तर्मुखतां व्रजस्यपि ।
न तेन सिद्धं तव किञ्चन क्वचिन्
न वाऽपि तेषां य इह त्वदन्तिके ॥
यथानिसर्गं निजकर्म धीयतां
यथेच्छमस्यां धरणौ सुरम्यताम् ।
शुभाशुभत्यागपरो विवेकदृग्
विभातमध्यास्व शिवं शिवेरितम् ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वपसि गरलबीजम्

बन्धवे काञ्चनार्थिन्
वपसि गरलबीजं
यदि, तव मतिरेषा नैव साधीयसी स्यात् ।
कनकमृगकथां तां विद्धि चैव स्मर त्वं
वपनमपि विषस्य स्यात् तवैव प्रहन्तृ ॥

आकाशोऽहं विशालः

आकाशोऽहं विशालः शकलविरहितः
शून्यशून्योऽप्यनन्तः
क्षोणीनां नृत्यभूमिस्तरणिविधुबुधा-
ङ्गारकैर्दीप्यमानः ।
सर्वेषामेव नित्यं सुगम इह ततः
सर्वतोऽहं प्रसन्नः
क्षुद्रैरेभिः कपालैर्घट किमिति
ममानन्ततामाच्छिनत्सि ॥

परमस्ववशा प्रकृतिरेव

कः खलु दध्यात् प्रकृते-
र्वेगाँस्तान् सुमधुरानमधुरान् वा ।
नान्यः कश्चित् स्ववशः
परमस्ववशा प्रकृतिरेव ॥
निदेशकास्ते त्वन्ये
यन्निर्देशा उपेक्षितुं शक्याः ।
निर्देशाः प्रकृतेस्तु
स्वयं झटिति पालिता एव ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

समं समेषां प्रियं कुर्वे

छिन्धि भिन्धि दह शोषय
यथेष्टमुत्खातय चूर्णय वा माम् ।
अहमस्मि रसालतरु
रसालमेव प्रदास्यामि ॥
देहि गालिकाः शतशो
ऽयशः प्रसारय परितः किमपि मित्र ।
त्यक्ष्यामि नैव नियते-
राप्तान् मधुरान् रसान् क्वापि ॥
शृणोमि पिकमधुगीतं
वायसरवमपि शृणोमि कटु कठिनम् ।
सर्वे मम सत्कार्याः
समं समेषां प्रियं कुर्वे ॥

नागेन्द्रहाराय

पवनाशनोऽस्मि हारः
शिवस्य नित्यशुद्धबुद्धमुक्तस्य ।
भजेऽहमपि समरसतां
शिवाङ्गसंसर्गमाहात्म्यात् ॥
दंष्ट्रा मे निर्गरला
तथापि न कथं सहे शिवद्वेषम् ?
दंष्ट्रा सा स्वयमेव
हन्ति द्वेष्टारमामूलात् ॥
क्षणं धृतिं भज दंष्ट्रे
सम्भवति स विजह्याद् द्रुतं द्वेषम् ।
शक्नोषि चेद् विषं जहि
जहिहि द्वेष्टारमत्रैव ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

भगवति मातर्नमस्तुभ्यम्

जननि त्वमेव गुरुरसि
परीक्षिकाऽपि परीक्षा त्वमेवासि ।
अपि निर्देक्ष्यसि मार्गं
श्वः किं नु मयास्ति करणीयम् ॥
अथवा स्वयं महेश्वरि
त्वमेव सर्वं प्रेरयसि सर्वत्र ।
तव यदभीष्टं कस्तत्
कथं निवारयितुमीष्टे क्व ॥
मधुकैटभौ निहत्य
निहत्य च महिषनिशुम्भशुम्भाद्यान् ।
मन्ये क्लान्ता शेषे
भगवति मातर्नमस्तुभ्यम् ॥
अयमेव ते निमेषो
गतौ जगत्याः शैथिल्यमानयति ।
जागृहि भगवति नचिराद्
भक्तान् सर्वाननुगृहाण ॥
उन्मेषस्ते प्राणः
शिवस्य सत्यस्य चापि विश्वस्य ।
न कुरु विलम्बं भगवति
जाग्रत्यधुनाऽपि शुम्भाद्याः ॥

विश्वासस्याभावः

विश्वासस्याभावः
परमाभावो भृशं मनुष्याणाम् ।
विश्वासो यदि नास्ति
मृत्यः श्रेयान् न निःश्वासः ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिवो वसति रजताद्रौ

शिवो वसति रजताद्रौ
भक्तश्च निवसति मृत्तिकाभूमौ ।
रज्जोः पन्थाः कश्चन
मिथोऽनुरक्तौ सुमेलयति ॥
रज्जोर्यानं पलमपि
न स्थायित्वं कदाचिदाप्नोति ।
यानं गतिमद् भक्तः
स्थितधोः सम्यक् समाश्रयते ॥
रजतगिरीशं नत्वा
यावत् स निवर्त्तते च मृद्भूमौ ।
शैवं तावद् रजतं
गङ्गाभावेन परिणमते ॥

पूर्वं स्वमनुशाधि

शासितुमिच्छसि सर्वान्
यदि तर्हि शाधि पूर्वमात्मानम् ।
अनुशिष्टे त्वयि सर्वे-
प्यन्ये शिष्टा भविष्यन्ति ॥
अन्धः स्वयमक्षिभ्या-
मंन्यान् प्रदिदर्शयिषसि सन्मार्गम् ।
कः श्रोष्यति तव वाणीं
को वा त्वयि विश्वसेद् द्रष्टा ॥
पिबतखादता प्रचलतु
निर्विशत निर्भरं भोग्यानि विधेः ।
वार्त्ता आदर्शानां
कामदुघाँ वः प्रिया वक्त्रै ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

जनन्या अङ्कः

अङ्के स्वपञ्जनन्याः
शिशुरीक्षते पितरं प्रतीपदिशि।
परिवर्त्याङ्गानि पुनः
पश्यति मातुर्मुखं लुब्धम् ॥
एवं क्रमेण कुहचित्
पराक् कदाचिदवलोकते प्राक् सः।
दृष्टे पितरि न दृश्या
माता तस्यां च सोऽदृश्यः ॥
एवं क्रमेण जीवाः
पितरं पश्यन्ति मातरं कुहचित्।
दृष्टे पितरि न माता
दृश्या तस्यां च सोऽदृश्यः ॥

तितउ सहस्रच्छिद्रम्

तितउ सहस्रच्छिद्रं
सावज्ञमसूयति पूर्णकुम्भाय।
गतिशीलमहं सततं
स्वयं जडो जडमयश्चैषः ॥
तितउ सहस्रच्छिद्र
नाधातुं त्वं किमप्यलं बन्धो।
शमयाम्यहं पिपासां
जीवनमाधाय मनुजानाम् ॥
रिक्तिस्तव स्वभावः
परिपूर्णता मम शिवमयी प्रकृतिः।
एनं स्वभावभेदं
जानीहि विधेहि निजकृत्यम् ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

परमे धाम्नि महेशः

परमे धाम्नि महेशः
शिवः क्वचिद् भाति भास्वरानन्तः ।
तारकितं नभ ऊर्ध्वं
नूनमेनं परिक्राम्यति ॥
सर्वे ग्रहाः ससर्गाः
तमिह रात्रावारात्रिकैर्नित्यम् ।
नक्षत्राणि च सर्वा-
ण्यर्चन्ति तमेव दीप्तानि ॥
मानव लक्ष्म्याभासं
पीतं कनकं सदैव पूजयसि ।
विस्मृत्य क्षणमेतत्
पूजय शिवमेव दीपैः स्वैः ॥

मृगेन्द्रः

न बिभेमि गजपतिभ्यो
न वृकेभ्यो नापि कृष्णसर्पेभ्यः ।
सततं तृणाय मन्ये
गोमायुगणान् विडालांश्च ॥
किन्तु न मनुतनयानां
धौर्त्यं बाल्ये कदाचिदभ्यस्तम् ।
दृष्ट्यैव मे हृता ये
ते मां कशया विनिघ्नन्ति ॥
मा वह गर्वं मानव
स्वकीयधौर्त्यस्य सत्त्वशून्यस्य ।
तव धौर्त्यमेव नचिरात्
तव जातिं मूलतो हन्यात् ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

दोलय पुच्छम्

दोलय पुच्छं शतशो
दर्शय दंष्ट्रां सहस्रशो वाऽपि ।
सारमेय तव भषणं
विस्मर्त्तुं केन शक्येत ॥
तव भषणेन कदाचिद्
भवतु धनपतेः कस्यचिद्धितमपि ।
भजसे ग्रासदमेव
लिप्सुस्त्वमिति को न जानाति ॥
भष भष, दोलय पुच्छं
दर्शय दंष्ट्रां पुनः पुनर्बन्धो ।
कैश्चिदेव दुत्कारैः
सद्यस्त्वं पलायसे चापि ॥

मन्दं वाहि समीरण

मन्दं वाहि समीरण
स्पृश चापि सदा सखे दिशः सर्वाः ।
एकत्र क्वापि न वस
वाहि च वाह्येव वाह्येव ॥
नीरागो निर्द्वेषो
नीरोगो निःस्पृहश्च निःस्वार्थः ।
सुखय समस्ताञ्जन्तून्
किमपि नहि गृहाण कस्माच्चित् ॥
वेगं न धेहि वायो
मा भूर्भीमः प्रभञ्जनोऽकरुणः ।
उत्खातैर्हरितानां
सेत्स्यति किं तव तरूणां हि ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पारेविश्वं प्रियो मे

पारेविश्वं प्रियो मे लसति शिवविभुः सर्वशक्तिप्रभावः
पारेदृश्यं, कदाचिन्नहि नयनपथं याति सोऽव्यक्तलीलः ।
प्रच्छन्नं तं दिदृक्षे तदपि विगणयन् सन्ततं स्वीयसीमां
श्रान्तस्तत्प्रातिनिध्यं दधति मृदुपलानोकहाभ्राणि वन्दे ।।
यः कोऽप्यर्चति तं यदीयविधिना यस्मिन् स्वरूपे स्थितं
या काचिन्नगरी तदीयवसति विद्वद्भिराकल्पिता ।
यः कश्चिद् दिवसस्तदीयदिवसो व्याख्यायते पण्डितैः
सर्वं तन्मनसा स्मरामि वचसा स्तौमि प्रणौम्यञ्जसा ।।

सर्वमेव मनोहरम्

छिक्काऽपि जृम्भाऽपि शिरोरुहोऽपि
कण्ठोऽपि पादोऽपि करोऽपि तस्याः ।
चेतो हरत्येव नृणां कथा का-
ऽधरस्य नेत्रस्य च विभ्रमाणाम् ।।
जलं पिबन्ती पिबतीव धैर्यं
भुवं स्पृशन्ती स्पृशतीव चेतः ।
यूनां, तनूजा प्रकृतेर्मनोज्ञा
किमस्ति तस्यां नहि यन्मनोज्ञम् ।।

काकः

काँ काँ करोतु काको
माधुर्यं चोरितं पिकेन मम ।
पिकः स्वतन्त्रः कर्त्ता
गायतु मधुरं रसालतरौ ।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मातर्भूमे

छाया वा भूमेः स्याद्
अथवा भवेद् यत् किमपि तत्त्वं तत् ।
कलङ्क एव विधौ तद्
व्यपदिश्यते न किमप्यन्यत् ॥
अपराद्धं किं सद्भि-
स्तव भूमे यत्त एव गर्ह्यन्ते ।
क्षिप्यन्ते दूष्यन्ते
तथा च लोकैः कलङ्क्यन्ते ॥
कथमीदृक् छाया तव
चन्द्रोऽपि यया कलङ्कितो भवति ।
अभिशप्ता किं विधिना
मातर्भूमे त्वमेवासि ॥

मार्गदर्शनम्

न मनो न हस्तपादं
क्लाम्यति कदापि परःशतैः कार्यैः ।
अनिश्चयेन क्लाम्यति
स्वान्तं सर्वं शरीरं च ॥
मार्गा अत्रानेके
कतमः श्रेष्ठ इति निश्चयो न भवति ।
क्लान्तिः परमा प्रविशति
तदैव सर्वेष्ववयवेषु ॥
भगवँस्त्वमेव दर्शय
कतमः श्रेष्ठो ममास्ति पन्था इति ।
त्वया दर्शितं सर्वं
स्वयमेव निश्चप्रचं भवति ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्वरय न नापि विलम्बय

गन्तव्यस्ते पन्था
अद्याप्यविदितो वर्त्तते तेऽपि ।
तथापि सज्जीभूतं
यानं त्वां प्रतीक्षते यात्रिन् ॥
त्वरय न नापि विलम्बय
समयं तं केवलं प्रतीक्षस्व ।
यदा विमानं गन्ता
गगनपथेनैव कुत्रापि ॥

सतां महिमा

परःशतैरपि यत्नै-
रसतामशकः कदाचिदुच्छेदः ।
सत्त्वं सतां त एव
प्रमाणयन्तीह कृत्यैः स्वैः ॥
लीलाधरः स भगवान्
सृजति चाप्यवति चापि हिनस्त्यसतः ।
रम्या तदीयलीला
सतां विवर्धयति महिमानम् ॥

अत एव वाहि पवन

प्रयोजनं स्यान्नो वा
कृत्स्ना प्रकृतिः सदा स्वयं याति ।
नापि प्रयोजनं चेद्
गतिरेव प्रयोजनं भवति ॥
तूष्णीं स्थितिः कदाचि-
न्न कल्पते कल्याणाय कस्यापि ।
अत एव वाहि याहि
पवन दिशास्वासु सर्वासु ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

रौतु न वा चरणायुधः

रौतु न वा चरणायुध
उदिते सूर्ये प्रातर्भवत्येव ।
विकसन्ति पङ्कजानि
हृष्यन्ति रथाङ्गनामानः ॥

अक्लेशो विरहे

सुषहं सर्वं लोके
दुःखं, शीतं जराऽऽतुरत्वकपि ।
न स कथमपि सोढव्यो
विरहे, क्लेशस्य यो विरहः ॥
सन्तो दुनन्ति विरहे
सङ्गमकाले दुनन्त्यसन्त इह ।
इति गोस्वामी तुलसी
विविनक्ति नृणां स्वरूपे द्वे ॥
किन्तु कथा का तेषां
ये प्रच्छन्नाः सदा यशो घ्नन्ति ।
विद्यासंहारपरा
विरहे तेभ्यः कुतः क्लेशः ॥

श्री सरस्वत्योरसङ्गतम्

न पलाये न च द्यूये
प्रव्रजाम्यसत्यरागहिंसाम्यः ।
सरस्वतीमनुभजितुं
लक्ष्म्यास्त्यागः सदा काम्यः ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मधुकरो द्विरेफः

नाहं मधुहा मनुजः
सततमहं मधुकरो द्विरेफ इह ।
विसृजाम्येव समस्तं
गुञ्जन् मकरन्दमादाय ॥
मानव विबुधम्मन्य
पठ रात्रिन्दिवं धर्मशास्त्राणि ।
जीववमेव परार्थं
मम, ते किं तादृशं क्वापि ॥
सत्याहिंसे केवल-
माधत्से सुवदने परमविवृते ।
अन्तःकरणे शस्त्रं
बहिश्च शास्त्रं, त्वमसि धन्यः ॥

शिशुरयम्

हसति खेलति रोदिति नृत्यति
पिबति खादति गच्छति चुम्बति ।
शिशुरयं चपलः सततं मुदं
किरति, धावति गायति नन्दति ॥

शून्यम्

शून्यं विना न सृष्टिः
शून्यं विना न रथस्य गतिमत्ता ।
शून्यं विना न दीप्तिः
शन्यं सर्वस्य हेतुरिह ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

परतंन्त्रः

कविरपि भूपालोऽपि
स्वयं समं स्वमर्थमुषसि साधयति ।
यस्तु सदा परतन्त्रः
कथं स्वमर्थं स साधयतु ।।
स तु वन्यस्तरुरेव
पिबति सलिलानि कदापि शक्रस्य ।
कदाचिदग्निः सहसा
दहति तदीयानि पत्राणि ।।

कः श्रद्धां जागरयेत्

कः श्रद्धां जागरयेल्
लिप्सुषु तेषु कनकैकलक्ष्येषु ।
श्रमोऽपि नहि न च विद्या
केवलकनके कुतः श्रद्धा ।।
कनकैकबलः शुम्भः
क्रेतुमभिलषति सरस्वतीं देवीम् ।
हन्त्येव सा तमद्य
गम्भीरान्तःस्मिता जननी ।।
देव्या निहतो महिषः
लङ्केशो दशशिराश्च रामेण ।
कंसारिणा च कंसः
त्वया कृतं किं मनोस्तनय ।।
गाँधी त्वया महात्मा-
ऽकरुण हतो हतस्सत्तमः कृश्तुः ।
हता असंख्या गुरवः
सन्ततमधुनाऽपि हन्यन्ते ।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मौमीयोऽयं हट्टः

भौभीयोऽयं हट्टः
कदापि न बुधं प्रतीक्षते बन्धो ।
यत् किञ्चिच्चिक्रीषसि
क्रीणीहि सपदि तदद्यैव ॥
अलमादर्शैस्तैस्तै-
र्यथार्थहट्टे यथार्थमेवास्ति ।
कुतोऽपि कथमपि सद्यः
किञ्चित् पण्यं गृहाणैव ॥
पण्यं पण्यं पण्यं
न किमप्यन्यदापणेषु वीक्ष्यमिह ।
आदाय किमपि पण्यं
देहि च भूयस्तदादत्स्व ॥

लसन्तु सन्तः

अप्यायास्यति समयः
सन्तः सुखिनो यदा भविष्यन्ति ।
क्षयोऽसतां स्यान्नो वा
सतां क्षयो नास्ति माङ्गलिकः ॥
मैत्री करुणा मुदिता
सत्यमहिंसाऽपरिग्रहोऽस्तेयम् ।
वर्धन्तामात्मगुणाः
सर्वेऽप्येते सतां सततम् ॥
लसन्तु सन्तः सदने
निर्विघ्नं स्वे सुसंस्कृते विमले ।
स्वगृहे वसन्त्वसन्तो
ऽप्यस्मिन् कस्यापि का हानिः ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

लोकजीवनम्

कश्चित् सर्वं स्वीयं
विक्रीय निर्मापयति सदनं स्वम् ।
किमप्यकृत्वाऽपि पुन-
र्दुरधिचिकीर्षति तदप्यपरः ॥
तपस्तितिक्षा सत्यं
मन्ये सर्वाणि पुस्तकेष्वेव ।
यथार्थनियमैस्तैस्तै-
रुर्व्याः कार्याणि साध्यन्ते ॥
उपदिश नैवात्मगुणान्
साधो हिंसामिथ्यात्मके जगति ।
भनक्ति लोकः प्रायो
द्वारं प्रतिवेशिनो नियतम् ॥
सार्थं वा व्यर्थं वा
लाभोऽन्येषामसह्यतां भजते ।
ते केचिदेव विरला
ये लोकायैव जीवन्ति ॥

भक्तिर्यजमानस्य

असज्जनो ग्लायतु नन्दतु प्रजा
पतिव्रता जीवतु सान्वया सुखम् ।
सुधीजनो ज्ञानविभां सुसेवतां
समर्पितात्मा यजमान एधताम् ॥
भयभूमयस्त्वनन्ता
गृहेऽपि मार्गेऽपि दिवि च भूमावपि ।
एका भक्तिः सुधिया-
मनपाया रक्षति प्राणान् ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

आसै तूष्णीम् ?

असौ तूष्णीमलसः
पलमपि न रोचत एतदपि यह्यम् ।
गतिमत्तैव प्रकृति-
स्तामुज्झित्वा न विश्रामः ॥

माया

मायाया उपदेशः
"ब्रूहि नहि सत्यं कथमपि क्वापि ।
आकाशः शास्ति सदा
सत्यं धर्मं तथा नियमान् ॥

सरो मानसं व्यक्त्वा

सरो मानसं त्यक्त्वा
परिश्वा श्वः क्वापि हंस गन्तासि ।
मा भूर्विमना बन्धो
पक्षौ ते स्तः सदा स्वस्थौ ॥
स्मृत्वा तवैव नाम
सोऽहमिति सन्ति हंस परमहंसाः ।
मानसपरिरवाभेदो
न रोचतां तुभ्यमेष सखे ॥
असि वाहनं विधातु-
र्गच्छ हंस तत्र यत्र स जिगमिषति ।
तव न किमपि गन्तव्यं
सखे गमनमेव ते कार्यम् ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

धातु द्वन्द्वः

स्थागम् धात्वोर्द्वन्द्वे
श्रेयो "गमे"व नहि कथमपि 'स्थे"ति ।
समादधति शास्त्रज्ञा
सुगच्छ गच्छैव गच्छैव ॥

अयं बालः

दुर्ललितोऽयं बालः
किमपि न विदधत् सदा मनो हरति ।
विदधत इमे प्रपञ्चान्
हरन्ति नैकान् धृतिं शान्तिम् ॥

गीतिः

असदाधातेभ्य इमे
बिभ्यति सन्तः सदा कथङ्कारम् ।
असतामसदाधाताः
स्वयं हि नश्यन्ति साधु सत्क्षिप्ताः ॥
मा भैषीः स्याः सुदृढः
सुधीः समेषां हितं सदा चिन्वन् ।
त्वमपि नाहतो नापि च
हता असन्तो हतास्तदाधाताः ॥
मङ्गलमेव विचिन्तय
सर्वेषामपि शिवं सा भद्रम् ।
नामङ्गलं कदाचित्
कस्यापि स्याद् गुणिन् भवेः शान्तः ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मधुकरमाहात्म्यम्

विसृजसि मधु मनुजेभ्यो
मकरन्दान् सुमनोभ्यः समादाय ।
माहात्म्यमिदं मधुकर
तवैव नान्यस्य कस्यापि ॥

मा कुरु तुण्डविवारम्

किं दर्शयसि मनुज रे
किं तव यद् दर्शनीयमस्ति सताम् ।
अपरिमितं तव दम्भं
को नाम दिदृक्षते विद्वान् ॥
भज तूष्णीं गिरिजेशं
कुरु यत् करणीयमस्ति साधु तव ।
व्यर्थं तुण्डविवारं
मा कार्षीरिह मृषाजल्पैः ॥

प्रगतिः

गतिमत्ता प्राणायत
आकाङ्क्षाणां विधेरनन्तानाम् ।
चलति वसुमती प्रतिपल-
मश्रान्ताऽऽस्मान् गमयितुमिह ॥
द्वेषश्चल रागैर्वा
युद्धाय बुभुक्षितः शमार्थं वा ।
ज्ञानार्थं यशसे वा
चलैव मूढोऽपि विद्वान् वा ॥
किन्तु गतिर्या नियता
लघुरपि भूयस्तमां स्थिराभासा ।
भद्राङ्किता च परितः
प्रगतिः सर्वोत्तमा सैव ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

रूपं देहि जयं देहि

असतां संघो नश्यतु
कृपया देव्या अनन्यसंहार्यः ।
संघश्च सतां राजतु
देव्याः कृपया सकलसुखदः ॥
को हेतुर्नहि जाने
त्वयि सत्यामपि देवि लसन्ति खलाः ।
अथवाऽसतां महिम्ना
वर्धन्ते सन्ततं सन्तः ॥
करोति पापं कुटिलः
सतां सरलतां पुनर्विवर्धयति ।
असदासुरी कुहूश्च
सज्जनराकां प्ररोचयति ॥

ते चण्डचाण्डालाः

मानववधमभ्यस्यति
चाण्डालो राजशासनाधीनः ।
न तत्र सोऽस्ति स्ववशो
राजाज्ञामेव पालयति ॥
दैन्याद् भृतिं स भजते
भृति रक्षार्थं चाचरति पापानि ।
सर्वं तस्य क्षम्यं
कथमपि नैवापराध्यति सः ॥
किन्तु कथा का तेषां
ये श्रेष्ठानां प्रभूतसत्त्वानाम्
सत्त्ववधे संलग्नाः
नूनं ते चण्डचाण्डालाः ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

भीतः काशः

पतत्रिणस्ते बहवः
सुहृदः खेलन्ति साधु मम कुसुमैः ।
अयमिह महापतत्री
वेगाद् वियतः समायाति ॥
इत्येवमेष काशो
भीतः श्वेतो मनुष्यमायाभ्यः ।
झटिति कम्पतेऽवनमति
वीक्ष्य विमानं पतत् खिले निकटे ॥

वियति गुञ्जसि

वियति गुञ्जसि गुञ्जसि चाम्बुजे
भ्रमर गुञ्जसि कोमलकुड्मले ।
अपि कदापि दवानलभस्मनां
सरसपूर्वकथास्वपि गुञ्जसि ॥

यस्य यदा

यस्य यदा यदभीष्टं
तदेव सत्यं सुहितं तदा तस्य ।
जलसेचनमिव मूले
कृषेरवग्रहगृहीताया, ॥
दृश्यः प्रियोऽपि काले
भवत्यदृश्यः प्रतीक्षितो भूयः ।
अदृश्यता महिमानं
वर्धयति चापि तदा तस्य ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

संवत्सरा यापिताः

संवत्सरा नवेषव
इमे मया यापिताः क्षितेरङ्के ।
षडपि रसाः परिपीता
धातुसमत्वाय चान्नाय ॥
आशां कामपि महतीं
मनसि निधायागमं भवन्नगरम् ।
जन्मान्तरीयकर्मा-
ण्यत्रापीमां निरुन्धन्ति ॥
अहं तवैवास्मि विभो
नहि मम किञ्चित् कुतोऽपि पृथगस्ति ।
यदा यथा भवदाज्ञा
तदैव सर्वं मदीयमपि ॥
षष्टितमे वर्षेऽहं
प्राविशमद्य प्रभातवेलायाम् ।
संवत्सरोऽयमेषां
तेषां विदधीत कल्याणम् ॥
नटराजो भगवानपि
संवत्सरान् दिशश्च वसुन्धरां च ।
धत्तां समेधयतु च
शिवं च भव्यं लसतु परितः ॥

नीरसतरुरेव

तरवः सरसा व्यर्थाः
पाकार्थं भोज्यभोजनादीनाम् ।
नीरसतरुरेवालं
पाकाय चाप्यग्नितापाय ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

दीपावली ज्वलतु

दीपावली ज्वलतु दीपितसत्यमार्गा
पुण्यावली फलतु सत्कृतसच्चरित्रा ।
पापावली गलतु सन्मतिकम्पधूता
दैन्यावली दलतु सज्जनसंस्कृता च ॥

प्रकृतिमनुमन्यस्व

लभसे यदपि प्रकृतेः
सर्वं तद् धेहि पालय च सम्यक् ।
तदुपेक्षा न श्रेयस
इति विद्धि तां चानुवर्त्तस्व ॥

सहकारतरो

बहुशः पीतः सर्वै-
र्मधुरः स्वादू रसो रसालानाम् ।
सहकारतरो चिन्ता
का ते सर्वोपकारक हे ॥
वृद्धस्त्वं सञ्जातः
सपदि त्वामुच्छेत्स्यन्ति ते मित्र ।
उद्वेगोऽनावश्नक
इह सर्वे त्वां नमस्यन्ति ॥
सर्गः कोऽपि न तादृक्
यो न कदाचिद् विनष्टतां भजते ।
केवलमयशः सुयशः
कुकृतं च सुकृतं चिरं लसति ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कनककुसुमभृङ्गः

नोपकृतं तव पत्या
सुवर्णभवने भवन्तमावेश्य ।
भृङ्ग कनककुसुमेषु
मकरन्दः कुत्र लभ्येत ॥
पश्य सुवर्णं जिघ्र च
गुञ्ज च भूयस्तरां सखे परितः ।
नहि तत्र रसो नहि मधु
कुसुमाकारेषु कनकेषु ॥
सरः कुतोऽपि गवेषय
कथमप्युड्डीय कनकभित्तिभ्यः ।
निर्विश सहजानन्दं
फुल्लसरोरुहेषु सहजेषु ॥
अभविष्यश्चेत् कृतकः-
कनकमयस्त्वमपि सन् भ्रमररूपः ।
गुञ्जनमपि ते न स्या-
न्नापि च मकरन्दरसपानम् ॥
किन्तु न तादृक् त्वमसि
जुगुञ्जिषा पिपासा च वर्त्तेते ।
शुष्कं कनकोद्यानं
त्यक्त्वा दूरे क्वचिद्याहि ॥
भूयांसो वसुधायां
वर्त्तन्ते मानवाःकनकदासाः ।
त एव तत्र रमन्तां
मकरन्दं स्वं त्वमन्विच्छ ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्विरेफ वितर मधूनि

द्विरेफ वितर मधूनि
रसिकेभ्यश्चानिशमातुरेभ्यश्च ।
तत्साधनानि परित-
श्चायं चायं वियति गुञ्जन् ॥
अपि हालिकः सुमूढ-
स्त्वमसि परेभ्यः श्राम्यन्ननिजतन्त्र ।
अथबा शिबिर्दधीचिः
स्वयं ददत् स्वं परेभ्योऽसि ॥
विलक्षणोऽसि मधुव्रत
सदाव्रतस्त्वं रसान् षडपि गृह्णन् ।
मधुरमेव मधु वितरसि
नमो नमस्ते महादान ॥

ग्रहणम्

आच्छादको लघीया-
नप्यावृणुते महान्तमपि देशम् ।
हिमांशुबिम्बं लघ्वपि
बृहन्तमादित्यमावृणुते ॥

अपदोऽहं न त्वपादोऽहम्

किं कथयसि, मदमत्तैः
स्पृष्टं भूपै पदं त्वया त्यक्तम् ।
न पदमिदं चिन्ताया
अपदोऽहं न त्वपादोऽहम् ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

आचरितं नहि सम्यक्

आचरितं नहि सम्यक्
पाणिनिना वा पुरा विधात्रा वा ।
व्यधायिषत यदुभाभ्यां
विकल्पमतयः पदे पदेऽनन्ताः ।।
पुंल्लिङ्गोऽपि क्लीवः
सगुणो वृद्धोऽपि निर्गुणो हीनः ।
स्थानी सन्नपि लुप्तो
जनपदलोको विलक्षणः प्रायः ।।

त्रिशूलधर

त्रिशूलधर किं पश्यसि
जहि सद्यो लुण्ठकान् धवलवसनान् ।
कियदवधि निरपराधा
वशंवदाः स्युर्वराकाणःम् ।।

(अ) करुणा

व्यापन्नं वीक्ष्य कञ्चित्
करुणरसमयी विश्वतोऽस्ति प्रवृतिः
सर्वः प्रायेण लोको विलपति विकलः
साश्रुनेत्रस्तदीयः ।
किन्तु श्वानश्च गृध्राः
पललभुज इमे नैव कारुण्यभाजः
सर्वानाहूय बन्धूंस्तनुमपि पतितां
भक्षयन्त्येव सद्यः ।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

उदेमि रक्तः

उदेमि रक्तः प्राच्यां
रक्तश्चास्तं व्रजामि वारुण्याम् ।
रक्तं बुभुक्षुभिस्तै—
र्मनुतनयैरेवमाहूतः ।
अपरिमितं मम तेजो
धित्सन्तीमे कदापि न मनुसुताः
रक्तं समस्तजगतः
प्रत्यहमेते पिपासन्ति ॥
अत एव मर्त्यलोके
श्रद्धाविश्वासशस्यमरुभूभौ ।
उदेमि रक्ताम्बर इह
शये च रक्ताम्बरः सायम् ।

सारल्यं देहि बालस्य

सारल्यं देहि बालस्य
यूनः शक्तिं महेश्वर ।
अनुभूतिं च वृद्धस्य
यथा स्यात् कृतकृत्यता ॥
चाञ्चल्यमेव बालस्य
यूनः स्वैरित्वमेव च ।
अतृप्तिं चापि वृद्धस्य
दधत्यद्य समे जनाः ॥
हिंसा लोभश्च कामश्च
सङ्कीर्णत्वं मदीऽमितः ।
तास्करी वृत्तिरालस्यं
वसन्त्येते ततः स्वयम् ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

दृष्टिः

कश्चित् पश्यति, दर्शनेन च
निजं क्लिश्नाति पुष्णात्ति वा
कश्चित् पश्यति नैव, किन्तु
मनसा दृश्यं च संमन्यते ॥
धन्यः सोऽस्ति महानिशाचरवरो
यः केवलं पश्यति
पापं क्लेशममानमेव परितस्तेनैव
सन्तुष्यति ॥

विश्वं मित्रम्

यस्य न सविधे विद्या
कृत्स्नोऽप्यरिरेव तस्य संसारः ।
यस्य तु सविधे विद्या
विश्वं विश्वं तदीयसुहृत् ॥

(अ) शान्तिः

बहिरन्तश्च भजसि यदि
शान्तिं, शान्ति गृहे न ते भविता ।
बहिर्यदि त्वमशान्तः
तव सद्मनि शान्तिरेव स्यात् ॥
नाम्नैव किन्तु शान्तिः
सा स्यात् क्षणभङ्गुरा बहिःशान्ता ।
स्वतः शासनान्न ऋते
शान्तिः कुत्रापि नः सुलभा ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषवृक्षः

विषमप्यमृतं क्वचिद् भवे-
दिति बुद्ध्या विषवृक्षमाश्रितः ।
विषमेष बुभुक्षति प्रियो
यदि का तस्य भवेत् प्रतिक्रिया ॥
अवतारयितुं तरोः पुन-
स्तमधश्चेन्नहि संभवं यदि ।
सहसा तरुमूलमेव तत्
सुधियो घ्नन्तु, तदेव तद्धितम् ॥

खलव्याप्तिः

स्थानं किमपि न तादृग्
यन्नाक्रान्तं खलैर्दुरभिषन्धैः ।
खल इह नारायण इव
व्याप्तः सर्वत्र वसुधायाम् ॥

आदौ सन्तोऽसुराश्चान्ते

रामेणाभिहता निशाचरचमूरित्याह पौराणिको
जाने नैव कथं तथापि दनुजैराक्रान्तमेतज्जगत् ।
मन्ये राक्षसयूथपैः क्वचिदिमे स्वन्तर्हितैः सज्जनाः
आकृष्य प्रसभं निशाचरकलाशालासु संशिक्षिताः ॥
एतत्कलाप्रवीणा
इमे कुमनसः सदा सुजनवेषाः ।
कवलयन्ति निखिलं जग-
दादौ सन्तोऽसुराश्चान्ते ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

हरिश्चन्द्र !

सुदुस्तरं तप एतत्
तपसि हरिश्चन्द्र सत्यरक्षायै ।
प्रियां सुतं चात्मानं
विक्रीणीषे सुनिर्ममं राजन् ॥
नारायणः स भगवान्
सुपश्यति सर्वं त्रायते च त्वाम् ।
किन्तु त्यक्ष्यति वसुधां
सपदि स, किमिदं न जानासि ?
त्वामनुकर्त्तुं व्यग्राः
केचन कलौ सत्यार्पितस्वान्ताः ।
असत्यसन्धानामिह
दासाः क्रीता भविष्यन्ति ॥

भद्रं शृणु भद्रं वद

कथं न लोको वाञ्छति
श्रोतुं भद्राणि सर्वतो दिग्भ्यः ।
प्रात र्वार्तापत्रे
श्रूयन्तेऽभद्रकाण्येव ॥
रथ्यास्वापणकेषु
सभासु परिषत्सु चापि मार्गेषु ।
अभद्रमय्यो वाण्यः
श्रूयन्ते सर्वतो दिक्षु ॥
भद्रं शृणु भद्रं वद
भद्रं कुरु भद्रमेव वीक्षस्व ।
वाञ्छात्मनोऽपि भद्रं
तथैव भद्रं परेषां च ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

धर्माधर्मौ

न किमपि पापं तादृग्
यंत्र न धर्मप्ररोहणावसरः ।
न कोऽपि धर्मस्तादृग्
यत्र न पापप्रतिच्छाया ॥
सघुताप्रचितो विनयः
पापस्य तु वर्त्तते महाधर्मः ।
अनन्यसामान्यमति-
र्धर्मेष्वपि पापमाधत्ते ॥

धन्या वसुन्धरा

परिवर्त्तते स्वयमसौ
परिधावति दिनकरं महाशक्तिः ।
धन्या वसुन्धरा सा
सदैव नवतामुपदिशन्ती ॥

जनुषः कारा

अनिन्द्रियोऽपि स पश्यति
भ्राम्यति दिवि दिवि स चाशरीरोऽपि ।
अमना विश्वं कलयति
सोऽयं जीवो महाशून्यः ॥
स्वतोऽर्पितं शून्यं तद्
रेखामात्रं सचेतनं चित्रम् ।
जीवापरपर्यायं
जनुषः कारां समायाति ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

जिजीविषा नैव

जिजीविषा व्यपगच्छति
लभे शमं न रागे विरागे वा ।
स्वयं न रागं जाने
परे न पश्यन्ति वैराग्गम् ॥
मनसा विरतोऽपि सदा
गृहिणां भारं स्वयं दधाम्येव ।
अविकत्थनोऽपि सेवे
गृहिणः सर्वान् यथाशक्ति ॥
नाहं भजामि तोषं
सिषेविषा वर्धतेतरामनिशम् ।
तेऽपि न कदापि तुष्टा
जिजीविषेयं कथं तर्हि ॥

रमय लिप्साम्

कुरु वार्त्ता मुद्राणां
मुद्रय नेत्रे स्वकीयबन्धुभ्यः ।
तूष्णीं गणय च संख्या
गुणिता द्वाभ्यां चतुर्भिर्वा ॥
धाव सदाऽऽदानेषु
दानेभ्यस्तु सततं पलायस्व ।
भुङ्क्ष्वाल्पं गणय बहु
पिधेहि सर्वं न परिधेहि ॥
मलिनं वस्त्रं मलिनां
मुखाकृतिं च हृदयं दधन्मलिनम् ।
मलिनैः "करेंसिनोटै"—
गूढैः क्रीडन् रमय लिप्साम् ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

न वेद्मि कोऽहम्

न वेद्मि कोऽहं न यते च वेदितुं
स्वरूपमन्यागुणकीर्त्तने रतः।
बहिर्मुखान्येव समानि खानि मे
मनोऽपि मे धावति सन्ततं बहिः॥
बहिर्गतेरभ्यासः
समस्तमेव जीवनं प्रभावयति।
आवृतमन्तर्द्वारं
भ्राम्यामि बहिर्बहिः सततम्॥

वृत्तिस्तास्करी

सर्वस्वमपहरन्ती
प्रख्यापयन्ती तस्करानन्यान्।
स्वं चैव सत्यसन्धं
प्रवर्त्तते तास्करी वृत्तिः॥
विनयोऽप्रतिमः क्वचिदपि
क्वचिदस्या अविनयोऽप्यतुलनीयः।
यथाकार्यसौविध्यं
विविधानेषा वहति वेषान्॥

बुभुक्षा

प्रवर्त्तयति नहि लोकं
तथा दिदृक्षा न वाऽपि शुश्रूषा।
व्यात्तानना पिशाची
यथा बुभुक्षा दुरावेशा॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुधा विपदाम्

दुरितयानगतिस्त्वतिशायिनी
द्युतिगतेरपि, नात्र वितर्कणा ।
निखिलमेव जगत् पलकैरियं
विशति याति तथाऽऽक्रमते बलात् ॥
इह भजन्ति निरोधकतां पथि
विपद एव गतेरपनोदिकाः ।
यदि भवानपिबद् विपदां सुधां
न दुरितं भवदन्तिकमेष्यति ॥

वात्सल्यरसधानी

अनवेक्ष्य सुतं बालं
पलमपि, जननी विमनायते भूरि ।
स एष वात्सल्यरसो
भुनक्ति जगतीं चरामचराम् ॥
अन्यस्तु भुंक्त एव
लोकः कनकं रसांश्च कान्ताश्च ।
केवलमेका जननी
भुनक्ति वात्सल्यरसधानी ॥

ममत्वम्

विचित्रमेतज्जगतः कथानकं
न चक्रमेतस्य कदाचन स्थिरम् ।
प्रतिक्षणं तत् परिवर्त्ति शाश्वतं
ममत्वमेकं स्थिरमत्र बन्धनम् ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कल्लोलजालं मधुकटुमयम्

को हि गणयेद् भावनाया
भावनानां वा तरङ्गान् ।
सुसनसः क्वचिदप्यमनसः
सुमधुराः क्वचिदप्यमधुराः ॥
हर्म्यवासाः क्वचन ता उटजाधिवासाः
कृषकवनितारासणीयकमण्डिताः
क्वचिदुन्मदातिसमृद्धमहिषीनखशिखादिरताः ॥
ग्रामजनतासहजभावपरायणाः
क्वचिदिह नृपतिनागरसुकृत्रिमकृत्यभारसमाकुलाः
भावनाः शतशः सहस्रश
आनयन्ति सुमानसे कल्लोलजालं मधुकटुमयम् ॥

त्वमेव धनपतिरेधि

अधिक्षिपसि पितरं सुत
सर्वं स्वीयं कुलाय विसृजन्तम्
पितरौ कुलं च बन्धून्
जिघांसुरात्मघ्न गृहदस्यो ॥
लुण्ठ लुण्ठ निजगेहे
सम्पदमखिलां समस्तबन्धूनाम् ।
त्वमेव धनपतिरेधि
सर्वेऽन्ये कुत्रचिद् यान्तु ॥
स्वार्थान्ध स्मर किन्तु
नियतिकृतं नियममिमं सुहितबधिर ।
पितुराशिषो न शापा-
स्त्वां वर्धयितुं क्षमाः क्वापि ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तितिक्षा

उपदिशसि तितिक्षामन्वहं योगिनाथ
समिदमनवद्यं मानवानां हितार्थम् ।
तदपि कुटिलभावैर्दुर्जनैः सज्जनेषु
वचनकुलिशपातान् क्षेपितान् किं सहेय ?
सज्जनतां हिंस्रश्चेद्
अधिक्षिपति कोऽपि तत्र मा भैषीः ।
अस्यार्थो हि स्पष्टः
सुजनो विजयी खलो विजितः ।।

गजपतिः

श्वा धावति च भषति च
वीक्ष्यैव सुहस्तिनं नृपतिवाहम् ।
वृत्तिरियं नीचानां
व्यर्थं धावन्ति गर्जन्ति ।।
गजपतिरथं मनागपि
नोद्विग्नः संसरति नृपतिमार्गे ।
मन्ये नहि स शृणोत्यपि
किमपि च, यात्येव यात्येव ।।

स्वच्छतराः पशवः

अन्तः कलुषं स्वच्छं
साधो दधत् पटं किं न जिह्रेषि ।
विनोपदेशं सन्तः
स्वच्छतराः सन्ति ते पशवः ।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विद्वन् का तव चिन्ता

विद्वन् का तव चिन्ता
त्वां चेत् कदाऽप्यविद्या नहि स्पृशति ।
रमस्व निजविद्याया-
मन्याविद्या उपेक्षस्व ॥
किन्तु विचारय मतियन्
कथं निवत्स्यसि कुले त्वविद्यानाम् ।
ते बहव एकलस्त्वं
ते सर्वे त्वां हनिष्यन्ति ॥
भुवि भगवानवतरति
दुर्वृत्तबहुलायां पुराकालात् ।
इतोऽप्यवद्यं किं स्यात्
कुलचौरा एव कुलगृहिशः ॥

चेरापुंजी

मेघालयस्त्वमसि शक्रसुहृच्च, सर्वं
ईर्ष्यन्ति ते, सुविपुलं हि जलं चिनोषि ।
हे चीरपुञ्ज महतीयमुदारता ते
तासामपामुपकृताः प्रतिवेशिनोऽन्ये ॥
नीरं महाजलनिधेः पवनश्चिनोति
प्रत्युत्क्षिपत्यपि च तद् गगने नगेन्द्रः ।
निःस्वार्थमेब गगनं विसृजत्यपस्ता-
स्त्वं हे सखे कृपणतां कथमाश्रयेथाः ॥
स्वार्थमयेऽस्मिँल्लोके
परार्थमेव भुवि जीवनं चिन्वन् ।
नाम्ना चेरापुंजी
सखे त्वमसि सत्तमो धन्यः ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

महिमा प्रजापतेः

व्याघ्रचर्मवृतविग्रहा वने
सारमेयततिरत्र भूयसी ।
भ्रामयत्यपि च शास्ति कुञ्जरान्
कीदृगेष महिमा प्रजापतेः ॥

शाखामूलीयम्

प्रकृतेर्नास्ति विरोधो
विकृतिभिराभिः स्वतः स्वकीयाभिः ।
प्रकृतिर्जनयति विकृतीः
पुष्णात्यन्ते च संहरति ॥
मानवसृष्टिरपीयं
प्रकृतेर्विकृतिरीप्सिततमा मातुः ।
अप्रकृतो मनुजमदः
तस्याः स्नेहं तु विरुणद्धि ॥
प्रकृतेर्जलदो वर्षति
शाखास्वग्रे ततस्ततो मूले ।
सञ्चिनुयुर्यदि शाखाः
नीरं, जलदस्य को दोषः ॥

कवितारमणी

कवितारमणी तरुणी
सङ्केतस्थलं कथं समुपयातु ।
न निर्मक्षिकं स्थलमपि
न चास्तमुपयाति भानुरपि ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

भुङ्क्ष्व तदेव

उपेक्षसे ब्रह्माण्डं
तज्जनकं दृश्यमप्यदृश्यं वा ।
सरितः सरांसि जलधीन्
गिरीन् वनानि चापलापयसि ॥
काञ्चनमेवोद्देश्यं
परमं मानव तवास्ति संवृत्तम् ।
भुङ्क्ष्व तदेव पिब च तत्
शृणुचापि तदेव कथयापि ॥

मानसमाक्रान्तम्

विक्रीणते मराला
वीथिषु मत्स्यान् वृतासु दुर्वृत्तैः ।
वकाश्च वीणापाणि]
विसृजन्त्यनुपल्वलं लुब्धाः ॥
मानसमिदमाक्रान्तं
सरो वराहैः सरोरुहामित्रैः ।
विपरीतमेव सर्वं
सर्वत्रैवास्ति दृश्यं नः ॥
अत एव मूर्त्तपूजां
विहाय शरणं व्रजाम्यमूर्त्तस्य ।
स महादेवोऽमूर्त्तः
सर्वान् मूर्त्तान् सदा पातु ॥
तदैव समरसता सा
शिवा मनुकुलेऽभितः समायायात् ।
पिपरीतमिदं सर्वं
भजेत्तदैवानुकूल्यं नः ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनन्तशक्तिः प्रकृतिः

प्रकृतेरनन्तशक्ते-
मातुरनन्तामुपेक्ष्य तान् विभवान् ।
विकृतेः शक्तीः सान्ता
भजन् मनुज किं न जिह्रेषि ?
समर्पणां कामयते
जननी प्रकृतिः सुतस्य सम्पूर्णाम् ।
न किमप्यदेयमस्या
अक्षय्यस्वान्महाकोषात् ॥
क्लेशः परमानन्दो
भवति, चापि दुर्गतिर्भवति सुगतिः ।
सर्वमसिद्धं सिध्यति
सद्यः प्रकृतौ प्रसन्नायाम् ॥

सत्यमीक्षस्व शान्तः

एकं सत्यं सर्वमेवापि सत्यं
मिथ्या सत्यं सत्यमेवापि सत्यम् ।
हिंसा सत्यं विप्रतीपं च सत्यं
सत्यं वन्दे विश्वरूपं शिवं तत् ॥
प्रेक्षावन्तः शास्त्रतर्कप्रदीपा-
नादायेतः सत्यमन्वेषयन्ति ।
दीपाधारः सत्यमस्तीति किन्तु
प्राकाश्यं तन्नैव तेषां प्रयाति ॥
दीपं त्यक्त्वा कामयस्वान्धकारं
साक्षात्कारः सत्यतत्त्वस्य तत्र ।
राकाशोभां दर्शमध्ये निषण्णो
दर्शं दर्शं सत्यमीक्षस्व शान्तः ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

भुवि काव्यम्

अहर्दिवं विचरन्ती
दिवं नमन्ती प्रजाः समादधती ।
वसुन्धरा किं प्रणयेत्
काव्यं काव्यं स्वयं साऽस्ति ॥
नीरसतरवोऽपि सदन-
मण्डनभूता जनान् सरसयन्ति ।
सरसास्तु ते सगिरयः
साब्धिद्वीपाः परमरम्याः ॥
तदिदं काव्यं तस्या-
श्चन्द्रार्कमरीचिभिः स्वयं व्यक्तम् ।
आस्वादयत हृदरयतः
सहृदयसुधियः सदा तूष्णीम् ॥

यात्रायां कष्टमनिवार्यम्

क्वचिदति दूरे गगने
मम वसतिः शिवमयी, न सन्देहः ।
निरतिशयं तत्र शिवं
सत्यं सुन्दरमनुक्षणं भाति ॥
विराट् कदाचिद् वर्त्ते
कदाचिदस्मि सूक्ष्मातिसूक्ष्मतनुः ।
कदापि मध्यममानः
कदापि खर्वो यथास्थानम् ॥
यात्रैवास्त्युद्देश्यं
कालविहायसदिशापरिक्रान्तेः ।
धृतिर्न हेया क्वचिदपि
यात्रायां कष्टमनिवार्यम् ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुमन्यस्वात्मानम्

अनुमन्यस्वात्मानं
सम्मानय चात्मानं निखिलवासं ।
पिब श्रमस्वेदसुधां
निर्विश मुक्तिं च भुक्तिं च ॥
अशनाया च पिपासा
द्वे अपि सरितौ सुदुर्गमे नूनम् ।
गत्या मत्या भक्त्या
सुतरे ते नात्र सन्देहः ॥
जहिहि द्वेषान् रागान्
शान्त्यादींस्तान् भयङ्करान् नक्रान् ।
सानन्दं स्वात्मानं
सुगमय च दिशासु सर्वासु ॥

विरही हंसः

सरसि मानसे वसतो
हंसाविति को गुणी न जानति ।
नीरक्षीरविवेकं
द्वावपि कुरुतो न सन्देहः ॥
विधेरनवधानादिह
किन्तु वियुक्ता हंसी सरसि वसति ।
हंसस्तु वकैश्छलितः
पल्वलमधिवसति विरहार्त्तः ॥
अपि हंसो व्यस्मार्षीन्
नीरक्षीरप्रशोधनीं स्वधियम् ।
अपि विधिरपि नहि दयते
तस्मिन् नापि च सरस्वती माता ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यथातथम्

यदपि यादृगिहास्ति ततोऽपि वा
वद तथैव तदत्र ततोऽपि वा ।
यदि न तत् कुरुपे भयकातर-
स्त्वमसि तस्कर एव न चेतरः॥

अनुवदति शुकः

अनुवदति शुकस्त्वामेष दासस्त्वदीयो
यदपि तव तदेष प्रत्यहं स्तौति शम्भो ।
नहि किमपि तदीयं सर्वमेव त्वदीयं
त्वमसि परमशक्तिः सर्वतन्त्रस्वतन्त्रः ॥

अवतारः

दुर्जनो हसति सज्जनतायां
दुर्जनो हसति दुर्जनतायाम् ।
दुर्जनो हसति सत्करणेषु
दुर्जनो हसति दुष्करणेषु ॥
सज्जनस्य तु कदापि न हास-
स्तस्य कार्यमिह केवलमेकम् ।
वीक्षतां विषमतां स धरायां
रोदितु प्रतिपलं च स तूष्णीम् ॥
किं कदापि भगवानवतारं
धास्यतीह वसुधाहितचिन्तः ।
तस्य नाम बहवोऽत्र जपन्ति
किं न तर्हि समुपैति स शीघ्रम् ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

असत्यबलम्

मनसा वचसा वपुषा
यः खलु सर्वात्मना वसति सत्ये ।
असत्यसन्धैः कुटिलैः
प्रचार्यते सोऽद्य मायावी ॥
नाद्य वानरी सेना
नापि कोऽपि दुरितनासिकाच्छेदी ।
सशरं धनुस्तु पृष्ठे
निधाय रामोऽनुतिष्ठतु किम् ॥
रावणसेना न तनुं
रामस्य जिघांसति क्वचित् कुटिला ।
हन्ति मनः सत्यबलं
तस्य तु मिथ्याप्रचारैस्तैः ॥
सदसत्कथयोर्युद्धे
न विजयते सत्यमद्य पिहितमुखम् ।
असत्यमेवाद्य बलं
सत्यं दौर्बल्यमेवाद्य ॥

तितिक्षार्थी

साधनमस्ति तितिक्षा
परं तत्र कस्य कुत्र सन्देहः ?
शिष्टानां समवाये
बलिनां श्लाघ्यो हि दुर्बलेषु शमः ॥
किन्तु तत्र किं क्रियतां
बलिनो यत्र दुर्बलं जिघांसन्ति ।
शास्त्रैः किमपि न सेत्स्यति
शस्त्राण्युपयोक्तुमभ्यस्य ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तृणाय मन्यस्व हालिकान्

सनोरगत्या लघु याहि यान रे
तृशाय मन्यस्व पदातिहालिकान् ।
दधातु जीवं म्रियतां जनोऽथवा
प्रयाहि वेगेन सुयान सत्वरम् ॥

यत्र यियाससि ततो याहि

आक्रान्तः स शृगालैः
सिंहोऽसंख्यै नं वाच्यतां याति ।
न वनराजता नहि वा-
ऽस्य वीरताऽपार्थिका भवति ॥
अप्रतिमाऽन्तःशक्तिः
प्रकृतेराप्तो महान् समुत्साहः ।
एकलगतिमत्ता च
ऋते त्वदन्यत्र सुलभाः क्व ॥
तूष्णीमासीनमपि
त्वां भाययितुं रुतैर्न ते शक्ताः ।
तव त्वखण्डं राज्यं
यत्र यियाससि ततो याहि ॥

मन एव

मनोमूर्त्तयः सर्वा
दृश्याः श्रव्या अश्रव्यदृश्याश्च ।
तदिररदत्र किमपि नहि
मनोमयं सर्वमेवात्र ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कोऽस्ति कस्य

कोऽपि कस्यचन नास्ति जगत्यां
कोऽपि किञ्चिदपि कामयते न ।
कोऽपि कस्यचन नास्ति सहृद् वा
कोऽपि कस्यचन नास्त्यसुहृद्वा ॥
सर्व एव निजमेव जगत्यां
पश्यतीह च गवेषयतेऽपि ।
स्वं सुखं निजसुवर्णसमूहं
सर्वतो जगति कामयते च ॥
श्वेतपक्षवकपङ्क्त्य एव
मीनभोजनरता अपि किन्तु ।
ते पदं दधति पाम्पतटाके
मुद्रिताक्षियुगला इतरार्थाः ॥

चिन्त्यम्

परमः कृपणस्त्वमसि
प्रकृतिपुरुष, तदपि नैव दोषाय ।
येन तवाप्युत्कर्ष-
स्तदपि न सहसे तदिह चिन्त्यम् ॥

धीरः

राकायते कुहूरपि
यस्ग कुहूयति सुचारु राका च ।
स एव विश्वविजेता
धीरो विपदि स्थिरः सम्पदि ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्मानः

सम्मानो तहि भिक्षया न दयया
नान्युन्नतैस्तैः पदैः
कोषैर्नो प्रचितैर्न चापि तपसा
नाप्यम्बरैर्लभ्यते ।
यो जानाति समाजमाननकलां
द्वेषं च यो वेत्ति नो
सम्मानः स्वयमेव वर्पति सदा
तन्मूर्ध्नि मोदावहः ॥

रक्तः प्रभाकर उदेषि

रक्तः प्रभाकर उदेषि रवे पुरस्ताद्
अस्तं प्रतीचि समुपैषि च तादृगेव ।
रक्ताम्बरो धरणिनन्दन इत्यमुष्य
माता प्रसीदतु तदर्थमयं प्रयोगः ॥
माता तथा किमपि कामयते न यद्वत्
स्वीयं शिशुं सपरिधानविलासलीलम् ।
यः कोऽपि तं स्पृहयति प्रतिमन्यते वा
तस्याः स नूनममितां ममतां विभर्त्ति ॥
त्वय्यागते कमलमुल्लसति प्रसन्नं
कोकः प्रसीदति तथैव च सर्वलोकः ।
सर्वान् प्रसादयसि विश्वविभाकरस्त्वं
त्वय्यागते कुमुदमेव कथं विवर्णम् ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

रविं वन्दे

अस्तंगामिनमर्कं
सायमपूजयन्न् आस्तिका भक्ताः ।
अद्य तु त एव पुरतो
रविं समुदितं नमस्यन्ति ॥
लोकस्यैव हितार्थं
रविरस्तं याति याति चात्युदमम् ।
निखिलकल्याणकृदसौ
देवः सूर्यः समान् पातु ॥

बालो दुर्ललितः

दुर्ललितोऽयं बालः
कदापि नैव विस्मृतिषयं याति ।
उत्कण्ठितं हि चेत-
स्तमेव नित्यं स्मरति रटति ॥
भगवान् शिवस्तमवतु
दधातु वर्धयतु शास्तु पुष्णातु ।
तैस्तैरयमनुभावैः
रमूमुहन्नः समानेव ॥

बिन्दौ सिन्धुः

बिन्दौ सिन्धुः सिन्धवे चापि बिन्दुः
सिन्धौ बिन्दु बिन्दुना चापि सिन्धुः ।
विन्दुः सिन्धुः सिन्धुरप्यस्ति बिन्दुः
सिन्धौ बिन्दौ नास्ति भेदः कदाचित् ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

रमणीनां मण्डनं सर्वम्

वहसि लावण्यभारं
सर्वावयवसर्वानुभावेषु ।
श्रान्ताऽपि कथं बाले
गोमयभारं वहसि शिरसि ।।
अथवा त्वदीयभारो
ऽधिकाधिको लावण्यमुपबृंहयाति ।
कविरप्येवं ब्रूते
रमणीनां मण्डनं सर्वम् ।।

आददे चित्रम्

आददे प्रकृतिभावकचित्रं
केवलं न किमपीतरदत्र ।
यद् यथा भवति तद्धि तथैव
लेखनीलघुपटे निदधामि ।।
दिव्यदिव्यमथ दिव्यमवन्यां
द्रष्टुमिच्छति सदा नरलोकः ।
नैव सिध्यति तदत्र ततो बा
मानवोऽयमत एव निराशः ।।
दृश्यतां दिवि रविश्च हिमांशुः
स्पृश्यतां पवन एष च मध्ये ।
जाह्नवी च भुवि पर्वतराजो
वृक्षगुल्मलतिकाश्च सुषेव्याः ।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्रन्दति सरस्वती

अधिमन्दिरमन्तःस्था
क्रन्दति माता सरस्वती विमला ।
मन्दिरपूजानियता
न पदार्था निर्मलाः सन्ति ॥
बधिकेभ्यो विक्रीता
हंसाः सर्वे बहिष्कृता द्वारात् ।
वकास्तदाकृतिभाजो
द्वारे तस्या विजृम्भन्ते ॥

उच्चैर्गन्ता

अस्तं गच्छन् रविरपि
शिथिलो रक्तश्च भवति विशेषेण ।
पदभारं त्यक्ष्यन्निह
तथैव जनः पदधरोऽप्यस्ति ॥
किन्तु न विस्मर रविरपि
प्रातः श्वः पुनरुदेष्यमाणोऽस्ति ।
रक्तोऽपि तदा गतिमान्
उच्चैर्गन्ता स आकाशे ॥

पुच्छं न चालय मृगेन्द्र

पुच्छं न चालय मृगेन्द्र न चापि जिह्वां
नेदृक् कुले तव कदापि परम्पराऽऽसीत् ।
एकस्त्वमस्य विपिनस्य महाधिराजो
धर्मे रुचिं न कुरु कर्हिचिदन्यदीये ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कस्त्वम्

क्वापि न विरमसि पलमपि
भ्राम्यसि सर्वत्र, निरन्तरं व्रजसि ।
अप्यसि पवनोऽस्वार्थो
ऽथवा विडालः पयश्चौरः ॥

किं ते महाजलनिधे

किं ते महाजलनिधे, मरुभूमयश्चेत्
पातुं न तेऽम्बुकणिकामपि ता लभन्ते ।
जीवन्तु ता विरहिता अथवा म्रियन्ता-
मक्षय्यजीवननिधे "करुणा कुतस्ते ॥
मुक्ता त्वया धरणिरेव पुरा नगेन्द्रं
प्राजीजनत् किल हिमालयमुन्नतात्मम् ।
योऽचञ्चलः स्थितमतिर्धवलात्मगात्रो
गङ्गां प्रवाहयति जीवनदां धरण्याः ॥
त्वत्कोषनीरकणिका यदि वातवेगा
गन्तुं क्वचिद् गगनमार्गधराः प्रवृत्ताः ।
प्रत्युद्गमय्य नचिरादवरुध्य चैताः
सर्वत्र वर्षयति सोऽयमगेन्द्र एव ॥

उत्तिष्ठ देव

उत्तिष्ठ देव नचिरादिह पश्य हंसा
धूर्त्तैर्वकैः सरस एव बहिष्क्रियन्ते ।
ते पल्वलेषु वकभेकसमाकुलेषु
वासं दधत्यपि तथापि न मृत्युभाजः ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

दम्भः

पिबत खादत नृत्यत खेलत
पठत वेदपुराणकथा मुखे ।
जपत वित्तकथा हृदये पुन-
र्वंचसि केवलमात्मगुणोदयम् ॥
कः किं करोतु, दुरितैरभितो वृतानि
संस्कर्त्तुमात्मरहितानि जनस्थलानि ।
लिप्सैकजीवनविहारविचारणा हि
दम्भोद्धताः सुवदना अधिकारभाजः ।

रे रे मानसराजहंस

रे रे मानसराजहंस विमना
मा भूवैकैः पीडितः
वासस्तेऽस्ति सरोवरः सुमनसामुल्लासको
मानसः ।
नीरक्षीरविवेचकः स्वयमसि
त्वं वाहनं ब्रह्मणो
निश्चिन्तं विहरैव, विश्वमखिलं
रम्या विहारस्थली ॥

मधु नवनवम्

प्रसूनादेकस्मादितरदितरत्त्वं प्रतिपलं
द्विरेफ प्राघूर्णो जिगमिषसि पार्तु नवरसान् ।
त्वदीयेयं त्यागग्रहणवरिवस्या प्रतिगृहं
रसैः षडभिः पथ्यं मधु नवनवं प्रापयतु नः ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

धर्मो मनुजस्य

जलस्य नियतो धर्म-
स्तथैव वह्नेः समीरणस्मापि ।
अपि कश्चित्तव धर्म्नो
नियतः केनापि हे मानव ॥
यासि कदाचिद् गगने
कदापि कामं पातालमाप्नोपि ।
किन्तु पृथिव्यां चरतः
कस्तव धर्मः स्वयं कथय ॥
तैः पाषण्डविवादैः
किं तव सेत्स्यति, पुरा च किं सिद्धम् :
भेदप्राचीरगणा
नूनमनन्ता विराजन्ते ॥

शिवता

विश्वनाथकृपया यदवाप्तं
तत् सदा शिवमयं नहि चान्यत् ।
यत्र सर्पविषमप्यमृतं च
साहचर्यवसने हि शिवं तत् ॥
नास्ति कश्चिदपि नित्यसुपुण्यो
नास्ति कश्चिदपि नित्यसुपायः ।
यादृशी प्रकृतिरस्ति हि यस्य
सैव याति शिवतां शिवभक्तेः ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

चिराय नैकत्र

कमलिनि शोभा सरस-
स्त्वयैव सततं प्रवर्धते, किन्तु ।
चिरमेकस्मिन् सरसि न
विलस नितान्तनिःसङ्गाऽपि ॥
अतिपरिचिता द्विरेफा
दशन्ति भूयस्तरां तवेह पदम् ।
जायस्वास्मिन् सदने
प्रवर्धस्व तत्र चान्यत्र ॥

अश्वत्थतरो

अश्वत्थतरोच्छायां
स्वीयां परितः प्रसारयालघ्वीम् ।
अयमस्ति ते स्वभावः
पथिकानां रुचिकरोऽप्येषः ॥
तथापि करिणश्चोष्ट्रा
यदि ते शाखाश्छिन्दन्तिति पत्राणि ।
तेषामपि स्वभावो
ऽयमिति वृथा मा गमः खेदम् ॥

कीदृक् तवायं मदः

मालाकार मदालसः प्रतिपलं शेषे न चैवेक्षसे
शुष्यद्गुल्मलतास्तरून्न दयया सिञ्चस्यमून् कर्हिचित् ।
कोऽपि त्वां प्रतिबोधयत्यपि यदा क्रोधाविलो जायसे
नो मुञ्चस्यपि नापि सिञ्चसि वनीं कीदृक् तवायं मदः ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजहंसः

न जाने क्व यायादयं राजहंसः
क्व शेतेऽस्य देवी परा स्वामिनी सा ।
यतो याति तत्रैव वार्त्ता वकानां
क एनं कुतः पालयेल्लालयेद्वा ॥

स्वार्थः

यद्यपि निखिलं विश्वं
स्वार्थायत्तं परस्परस्पर्धि ।
तथापि ममता श्रद्धा
भक्तिः प्रेमा च विजयन्ते ॥
परिहित एभिः स्वार्थः
कामपि परमां रमणीयतां भजति ।
नग्नः स एव जनयति
हिंसां द्वेषं च वैरस्यम् ॥

सत्यम्

"सत्यमेव जयते" भवि
दिवि चेति समे वदन्ति विद्वासः ।
वेद्भि न किमस्ति सत्यं
किं तद्रूपं क आत्माऽस्य ॥
शिवं यदपि यत् सुन्दर-
मस्ति तदेवेह सत्यमित्याहुः ।
इतरत् सर्वमसत्यं
कृतं कुतर्कैः विवादैर्वा ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

गृहागतः संन्यासी

गृह एष स एव यत्र शय्याप्यकवयदाशु मनोहरान् प्रबन्धान्
उषसि च भगवाननुग्रहैः स्वैः प्रतिदिनमागमयन् नवान्प्रमोदान् ।
स इह गृह इदं च वस्तुजातं मयि विरतं विदयं कथं क्षणेन
त्वरयति गमनं स्वकीय सीम्नो नहि च मदागमनं ध्रुवीकरोति ॥

विरति वियोगे

संयोगे वैराग्यं
भावयन्ति बहवोऽर्दिताः स्वकृत्यैः ।
किन्तु वियोगे सत्यपि
यदि वैराग्यं नमस्यास्ते ॥
उपचीयतेऽनुरक्तिः—
प्रतिधावति च प्रतिक्षणं हृदयम् ।
सतां वियोगदशायां
स्थितिरनिर्वचनीयतां भजति ॥

जयति धरित्री

सद्गन्धो दुर्गन्धो
वाऽपि तावदेव सत्यमावृणुते ।
यावत्तद्बहिरङ्गं
नापाक्रियते तु पवनेन ॥
जयति तथापि धरित्री
माता मलवाहिनी च सर्वेषाम् ।
उर्वरकीकुरुते या
सर्वाण्यपि मलानि मलिनानि ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

दुष्प्रपञ्चो नमस्यः

सर्वान् भावान् हरति मुदुलान् सत्वरं व्यर्थभीतः
कार्यं त्यक्त्वा सपदि रमतेऽकार्यजातेषु लीनः ।
भक्ति मायामय च ममतामस्यति व्यग्रचेताः
सोऽयं कार्याप्रकरणपटुर्दुष्प्रपञ्चो नमस्यः ॥

द्वारमपावृणु

आलोकय तद् द्वारं
यत्र न रागो जयी न वा द्वेषः ।
प्रेमैव यत्र जयति
निरवच्छिन्नः प्रसादमयः ॥
मैत्री यत्र हृदयज।
सहजा सुलभा नार्थान्तरापेक्षा ।
न यत्र काञ्चनदासाः
पतयो विश्वस्य लोकस्य ॥

सन्तोऽसन्तः

न विरोधोऽस्ति सदसतो
द्वावपि संवर्द्धकौ सदा जगतः ।
मथित उभाभ्यामर्णव
उद्वमति सुधां मरणहरणीम् ॥
विषं पिबति नटराजः
समवति स सतोऽतसश्च कारुणिकः ।
केशवकृपया सन्तः
सुधां पिबन्तो विराजन्ते ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तटाकः

मा कुरु गर्वं सागर
गाम्भीर्ये स्वे रत्नाकरत्वे च ।
जीवनमेव तवेदं
क्षारं नैवोपयोगितां भजते ॥
साधीयान् स तटाकः
फुल्लाम्भोजनिधानं सुविमलश्च
तृषिता यत्र विहङ्गा
मजुजाश्च सदैव तृप्तिमुपयन्ति ॥

पन्थाः कुलपते

कर्णेजपैः सह रमस्व न सत्यमास्य
आधेहि नापि वद कुत्रचिदप्यलीकम्
सर्वं सहस्व दुरितं विदधत् स्वधर्मं
शल्यार्पिते कुलपते पथि याहि धावन् ॥

उपकृतिज्ञः

पान्थ तरुच्छायाश्रित
किमिति न सादरं तदुपकृतिं स्मरसि ।
स्मृतिशक्तिः क्षीणा चे
च्छिन्धि न तदपि मूलमेतस्य ॥
त्यक्ष्यति विश्वासनिधिः
परशुकरे त्वयि, जगन्निखिलमेव ।
नोपकरिष्यति कश्चन
कदापि कस्यापि कुत्रापि ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सत्यमेकं पिपासा

कश्चित् कान्ताधरमधुपतामीहते सर्वदैव
कश्चिल्लक्ष्मीचरणसलिलं व्यग्र आस्ते पिपासुः ।
गाङ्गं नीरं शिवशिरसि यत् तत् पिपासुश्च कोऽपि
किं शास्त्रार्थे निखिलजगतः सत्यमेकं पिपासा ॥

मनोः सर्गः

विचित्रो मनोः सर्ग एषोऽस्त्यपूर्वः
सदा विस्मरत्येव साध्यं स्वकीयम् ।
निरर्थेषु सार्थेषु वा साधनेषु
रतः साग्रहं हन्ति साध्यं स्वमेव ॥
स्वयं चोरयित्वा स्वगेहस्य रत्नं
परेषां गृहात् कण्टकान्याचिनोति ।
सदा व्यग्र आस्ते कथं कुत्र यायाद्
दहेद् दाहयेद्वा परेषां गृहान् सः ॥

त्वममरः

मा भूर्हालिक विमना
अन्ये चेद् भुञ्जते हलस्य फलम् ।
रसमपि नैव पिपास
फलस्य पत्रस्य काण्डस्य ॥
स्वामी ताडयतु त्वां
कामं भोजयतु वा कशाघातान् ।
त्वमसि तथापि विजिष्णु-
स्ते सन्ति हतास्त्वमस्यमरः ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्पर्धागर्वाः सदा खर्वाः

उत्तुङ्गो हिमगिरिरय-
मास्ते तूष्णीं विलोकयन् मनुजान् ।
खर्वा अपि ते सर्वे
मनसा वचसा हिमालयायन्ते ॥
नहि मम किमपि विनश्येत्
सर्वे यदि मम भजेयुरिह समताम् ।
क्लेशो ममैक एव
स्पर्धागर्वाः सदा खर्वाः ॥

शिवस्य करुणा

नहि वेद्मि शिवो मम कुत्र गतो
न शृणोति वचो मम दीनमिह ।
विलयामि लपामि च नाम शिवं
न शिवो दयते मयि नापि शिवा ॥
करुणावरुणालय एष सदा
करुणां वितनोति निजां परितः ।
नहि वेद्मि कथं पिहिता क्व च सा
समुपैति न मां न समुज्झति च ॥
वद मम शिव सद्यः क्वास्ति ते मे निवासः
निरवधि वसतिः स्याद्यत्र नित्ये त्वदङ्के ।
जगति तु सकलेऽस्मिन् सर्वतः सन्ति सीमाः
क्षणमिह ममताऽऽस्ते तत्क्षणादन्यतः सा ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

फलं सात्त्विकं

सहकारतरो धन्य-
स्त्वमसि वसन्ते पुष्प्यसि फलसि चापि ।
अग्रेऽम्लं मधुरान्तं
तव फलमिह सात्त्विकं जयति ॥

शुक नोद्विजस्व

शुक नोद्विजस्व कथमपि
फलात् तु पञ्जरेऽस्मिन् कटुकतिक्तात् ।
ईदृग्भिरेव फलकै-
स्त्वं द्विजवर वाग्मितां भजसि ॥

शङ्करः शंतनेति

कोऽयं कोऽसौ क्व च निवसति प्रावृतः केन गादं
किं रूपोऽसौ कथमिह कदाप्यस्ति नो नः सुदर्शः ।
तूष्णीं सर्वं स्वयमिह ततोऽन्यत्र वा सर्वतोऽपि
सर्वान् विघ्नान् हरति स सदा शङ्करः शं तनोति ॥

स्तुति

कुसुमे यतोऽपि गुञ्जसि
मधुकर गुणान् गाय तस्य तस्यैव ।
जीवनकलाऽस्ति सैषा
नैवाशङ्कस्व पैशुन्यम् ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मशकः

मशकस्येयं प्रकृति-
दंशति शिरसि पुरस्ताच्च पृष्टे च ।
अलमाक्रोशै र्बन्धो
मशकच्छद एव ते शरणम् ॥
दशति यदि क्षुद्रस्त्वां
त्वं नहि कलुषीकुरुष्व निजहस्तम् ।
दूरे तिष्ठतु मशक-
स्तदेव करणं महाकरणम् ॥

श्रीविश्वनाथश्रीवेङ्कटेशीयम्

"श्री वेङ्कटाचलपते न धरातलस्थं
पापं दिदृक्षस इतीश धरां जहासि ।
पद्मावती तु न जिहासति पङ्कमग्नां
भूमिं न वाऽपि हृदयेश्वरवेङ्कटेशम् ॥
वैराग्यमेतदिह ते च तथाऽनुरागो
मातुः, शिवं वितनुतां सततं समेषान् ।
पापक्षयोऽपि भपतादनुगृह्यतां च
पापी जनोऽपि, युवयोर्विरहप्रभावात् ॥"
"हे विश्वनाथ तव मङ्गलशास्तिराप्ता
व्यंग्यात्मिका विरहगीतकथाऽप्यवापि ।
बद्धोऽस्मि सर्वमृणमस्ति मया प्रदेयं
सख्ये तवैव, शृणुते न स सत्त्ववाणीम् ॥
सत्त्वं तु सत्यमहितं न कदाप्यनर्था-
नर्थाञ्जिघृक्षति तथापि जिजीविषाऽस्य ।
त्वं पाहि सत्त्वमपि सत्यमपीश तूर्णं
सख्युस्त एव दययोभयमत्र साध्यम् ॥"

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नीचैर्गामी

नीचैर्गमनं धर्मः
सहजस्ते सलिल कोऽत्र सन्देहः ।
शक्त्या प्रसभं नीयथ
उच्चैर्नात्रास्ति वैमत्यम् ॥
शक्तिः सा प्रतिरोधा-
दवाप्यते नहि कदाचिदनुरोधात् ।
नीचैर्गामी नीचै-
रेव निसर्गतः स्वयं याति ॥

परधर्मः

आलोकयति दिवाकर
आह्लादयति च विधुः सकललोकम् ।
पवनः सुखयति सर्वान्
नहि कश्चिदन्यीन्यमाक्षिपति ॥
मानव एष विचित्रः
स्वं कार्यं प्रायः स विस्मरति ।
स्मरति परेषां कार्यं
गर्जति वर्षति च वह्निकणान् ॥

लघु द्विजः

काकोऽभ्य सूयति पिकाय
"लघुर्द्विजोऽयं कृष्णो, न कर्कशखं च कदापि धत्ते" ।
नो वेत्ति हर्त्तुमपि धान्यकणान् गृहेभ्यो
नैवापि बिभ्यति जना मृदुभाषिणोऽस्मात् ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

भ्रान्तिः

किमिति न पश्यसि मानव
शोभां नीलाम्वरां हरितपर्णाम् ।
सहजां सुभगां दिव्यां
भ्राम्यसि शुष्केषु कनकेषु ॥
माताऽस्ति रत्नगर्भा
पारावारोऽपि रत्नाकरस्तेऽस्ति ।
रत्न प्रभवो गिरिराड्
धिक् त्वां कनकान्ध मुन्मत्तम् ॥

भावास्त्रयः

ममता तवता तत्ते-
त्यमीषु सर्वे जालेषु चद्धाः स्मः ।
तवतातत्ते ममतां
जिघांसतः सा च ते सततम् ॥
सङ्ग्राम एष दुर्जव
इति चेन्मा भूर्विमना निराशश्च ।
ममतायामेव सखे
तवतां तत्तां समाधेहि ॥

स्वास्थ्यम्

तदैव वैषम्यमिहाययौ पुरो
नृणां यदारभ्य परोपकारिणः ।
स्वकीयकृत्यं समुपेक्ष्य लौकिकं
परोपकाराय ययुस्ततस्ततः ॥
स्वकीयसाध्यं स्वयमेव चेत्समे
सुसाधयेयुर्विधिपूर्वकं मुदा ।
तदैव लोके परितः सुखं शुभं
समागमिष्यत्यसतां च विप्लवः ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सतां सङ्गोऽसद्भिः

सतां सङ्गोऽसद्भिः कथःमपि कुपापेन भवति
न सन्तो वर्धन्ते नहि च सुखिनोऽसन्त इतरे ।
अहिंसा साधूनामनवरतहिंसा च कुधियां
न शान्तिं नाशान्तिं, भ्रममिह तनोति प्रतिपलम् ॥

शतबिलम्

खलानां दुर्वृत्तं शतबिलमितो मूषकगृहं
न जानेच्छिद्रेण क्व तदिह कदाऽऽयास्यति पुरः ।
कणानां धान्यानामपहरणशीलः प्रतिपलं
यथासौविध्यं स प्रतिहरति संचाययति च ॥

अनन्तविजयः

जानामि मार्गणविसर्गकलां सुसम्यक्
प्रायेण नास्ति मम किन्तु ततः प्रवृत्तिः ।
प्रेप्साम्यनन्तविजयं सुमनःसुशस्त्रै-
र्यत्राहमस्मि विजयी विजयी समोऽपि ॥

अमरता

प्रतिदिनं प्रतिहोरमनुक्षणं
नवजनुः प्रलयोऽपि नवोऽस्ति नः ।
य इह वेत्ति नवद्वयमन्वहं
स हि भजेद्विदुषां धुरि वन्द्यताम् ॥
नहि भयं प्रलयान्न च लिप्सुता
जनुष इत्यमरत्वसुलक्षणम् ।
समरसाऽमरतेयमभीप्सिता-
ऽनवरतं गुणिनां नियतात्मनाम् ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

शीलं समस्य

रामः शीलमुदाहरत्यविरंत चित्ते वचः कर्मसु
सत्यं जीवनमस्ति तस्य करुणा पाथेयमस्यान्वहम् ।
रामः किं विदधातु सैष कुहचिन्नाप्नोति कञ्चिज्जनं
यः स्याल्लक्ष्मब एव बाऽपि भरतः स्यद्वाऽप्यसौ मारुतिः ।।

महत्त्वाकाङ्क्षा

जीयान्मे लाक्ष्मणी वृत्ति-
र्जीयान्मारुतिसेवना ।
शिवस्य नीलकण्ठत्वं
जीयान्नित्यं गृहे गृहे ।।

नियमाः

रे रे मानव सावधानमनसा मित्र क्षणं श्रूपतां
भूयांसो नियमास्त्वया विरचिता बन्दी त्वमेषामसि ।
ते सर्वे नियमा हिताय यदि ते कल्पद्रुमा एव ते ।
नो चेत्ते तव जीवनस्य सततं भारा दुरन्ता इह ।

उपदेशो मार्जार्याः

समुपदिशति मृगराजं
मार्जारीयं बुभुक्षिता ह्रीणा ।
"बिभेषि मार्जारेभ्यः
किमिति न तानत्र विनिहंसि" ।।
वाचो हि दुर्बलानां
क्षुद्रस्वार्था उद्दीपिका भवन्त्येव ।
शक्तेरयमिह महिमा
नैव दुर्बलेषु सा रमते ।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कालचित्रम्

चित्रग्राहकयन्त्रं
दिव्यं मे किमपि देहि हे भगवन् ।
येन समस्तमतीतं
प्रस्तुतमनागतं चित्र्येत ।।
यत्किमपि कुर्महेऽद्य
सर्वं तद् विस्मराम एव श्वः ।।
चित्रीकृतं तु सर्वं
हस्तामलकं भवेदेव ।।

गृहः

गृहः स एव गृहोऽस्ति
यतोऽस्ति मातुः स्नेहः प्रियाप्रेम ।
वात्सल्यं चापि शिशो
र्यत्रैतन्नास्ति तत्कारा ।।

गीतिः

गङ्गा विमला धारा
सौधी भुक्तेः प्रसूश्च मुक्तेश्च ।
यमुना सरयूरस्सी
शालिग्रामी च शेरतेऽङ्केऽस्याः ।।
कः कथयति जलधारा
जडेयमवशाऽयतिः सरिन्मात्रम् ।
कृषकाणां भक्तानां
प्रत्यक्षेयं मता सुहृन्माता ।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

दैत्याः

एतत् तारकितं नभो, गिरिणदी पाथोधिगुल्मद्रुमै
रम्येयं वसुधाऽस्मदीयजननी सर्वंसहा रत्नसूः।
को हेतुर्नहि बिद्महे कथममी दैत्या मनुष्यामिधाः
सर्वं हन्तुमिहोद्यता अविरतं स्वात्मानमप्यायुधैः ॥

जीवति हन्यमानः

साधुर्बुभूषामि न किन्तु साधु-
भंवामि सर्वांशत आहवेऽस्मिन्।
शक्तिर्न साधुं भजते कदाचित्
तस्यापि शक्ते विरतिः प्रकृत्या ॥
किं सोऽपि कुर्यान्नहि तस्य पाता
लोकेऽस्ति लभ्यः स्वयमेव कोऽपि।
अयाचमानोऽभयमातुरः स
सङ्गेऽसतां जीवति हन्यमानः ॥

वयं नहि सरलाः

जननी वसुधाऽस्माकं
बिभर्त्ति सर्वान् स्वयं समैर्भावैः।
तदपि वयं नहि सरलाः
सरलाः केचिद् द्रुमा एव ॥
नित्यमतृप्ता मनुजा
अनन्त लिप्साः सदा वहन्तोऽमी
दृश्याद् वाऽदृश्याद् वा
सौन्दर्यात् पराङ्मुखा एव ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

असदनुबन्धाः

असतामेषा प्रकृतिः
नैव सहन्ते कदापि ते सत्यम् ।
जालैर्विविधैरस्त्रै-
र्बध्नन्ति जिघांसन्ति सदैव सतः ॥
तथापि सत्यं सत्यं
सन्तः सन्तः सदैव सन्त्येव ।
असतामसदनुबन्धाः
प्रत्याहारेष्विवाऽपरिग्राह्याः ॥

त्वमहं तदिदम्

त्वमहं तदिदं द्वयमपि
नैव क्वचिदपि च भिन्नतां याति ।
परस्पराश्रयमेकं
विश्वं हि नैकवियुक्तमपि पूर्णम् ॥
चत्वारोऽपि विभागा
निकटे दूरेऽथवा स्थिताः सततम् ।
साधयन्ति विश्वेषां
विश्वत्वं नात्र सन्देहः ॥

एधि त्वमेव

किमित्ययं दम्भ उपास्यते सखे
त्वमस्युपास्यो नरवर्ष्मवानपि ।
यदप्यसि त्वं तदिहैधि तत्र च
न तेन हे मित्र तवायशः क्वचित् ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रेयान् स्वधर्मः

पल्वल वृथा तवेर्ष्या
जलधिं प्रति "तरङ्गा न ते सन्ति"।
ऊष्माणमाह्वयसि मूढो
यथा प्रतप्तः तरङ्गी स्याः ॥
किन्तु न विस्मर मित्र
तथा प्रशुष्कः क्षणात् प्रलीयेथाः।
नो लाभस्तव कश्चन
स्वयं स्वकृत्यैः कथं नश्यसि ॥

गर्जनम्

नहि मां भृकुटिस्तव भाययते
दयितोऽसि विडाल तथापि मम।
विहरान्यगृहेषु पयश्च पिब
जहि निर्भरमुन्दुरुमद्धि तथा ॥
नहि मामिह पञ्जरबद्धमपि
दशनैरपि भाययितुं प्रसर।
मम गर्जनमेकमिहैव सखे
तव भेत्स्यति सद्य इहैव शिरः ॥

सविता

श्रान्तोऽपि नैव विरमामि, सदैव यामि
प्राच्यामुदेमि सविता शयितः प्रतीच्याम्।
धन्योऽहमस्मि सततं सकलं बिभर्मि
भुञ्जे न किञ्चिदपि नित्यमहं भुनज्मि।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

रथयात्रा

रथेन सर्वेश्वर एत्युपैति च
प्रतिक्षणं द्रष्टुमिह प्रजाः समाः ।
वयं तु भोग्याहितलोचना न तं
कदापि पश्याम इतस्ततोऽथवा ॥
असौ न नः कामयतेऽपि "वोटकं"
न किञ्चिदर्थान्तरमस्य काङ्क्षितम् ।
स केवलं दर्शयते स्वविग्रहं
दिदृक्षते चापि स आत्मसन्ततीः ॥
स्वहस्तपादं च निजं मनः समे
स्वधर्मयन्त्रे विनिवेश्य सादरम् ।
शिवानि ते तस्य फलानि भुञ्जता-
मितीश्वरो वाञ्छति वीक्षितुं रथी ॥

सुषमा

चर्मास्थिमांसमयमस्ति वपुः समेषां
संशीतिरत्र नहि कस्यचिदस्ति जाने ।
जाने न किन्तु किमिहास्ति विलक्षणं तन्
नेत्रे यदाकृषति चुम्बति मांनसं च ॥

गगनकुसुमम्

कः कथयति नहि कुसुमं
गगने, तत्रैव तु सन्ति कुसुमानि ।
भुवि तु कण्टकान्येव
कनकमयानि लौहमयानि ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अविकारी रसः

निपीय वात्सल्यरसं सुनिर्भरं
न कस्य सोदाङ्कुरितं भवेन्मनः ।
तदस्ति तत्त्वं निखिलं सनातनं
न यत्र सीमा नहि काऽपि विक्रिया ॥

नमामि तव महिमानम्

करुणा महाम्बुनिधिरसि
किन्तु दिदृक्षुं न कृतार्थतां नयसि ।
पारेविश्वं तूष्णीं
स्थितोऽप्यदृश्यः समुन्मिषसि ॥
इच्छसि सर्वे सत्तां
तव विस्मरन्तु विदन्तु निजसत्ताम् ।
निजसत्तैव न सिध्यति
त्वां विनेति विस्मरेम कथम् ॥
किमिति तवाभिनिवेशो
मिथो विरोधिनि निसर्गजालेऽस्मिन् ।
निजादिदर्शयिषैव
त्वामत्र, मन्ये प्रवर्त्तयति ॥
अलमेभिर्भ्रमजालै-
र्दृगदृश्योऽपि न भवाँस्तु हृददृश्यः ।
तव करुणाऽपि परिचिता
कुत्र तवापह्नवोऽप्यधुना ॥
नमामि तव महिमानं
तथापि नित्यं सनातनं सत्यम् ।
शिवं च सुन्दरमेकं
दृश्यादृश्यातिगं सुलभम् ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

उच्चैर्जिगमिषा

उच्चैरस्ति जिगमिषा
चेद् भारमल्पीयांसमेव वह ।
क्षमतां पदोर्विवर्धय
स्वेदाम्बुनिधौ तथा स्नाहि ॥
आसनमध्यासीनो
न किमपि कृत्वा शयान इह तूष्णीम् ।
नहि पदमेकं क्राम्यति
कथं स उच्चैर्गतिं लभताम् ॥

अतिथिर्वाऽऽतिथेयो वा

गृहा इमे मम नो वा
तथापि निवसामि तत्र तत्रापि ।
भुञ्जेऽपि भोजयाम्यपि
कुर्वे किमपि कारयाम्यपि च ॥
सम्मानादपमानं
लभेऽत्रकृताच्च परःशता निकृतीः ।
अधुनाऽपि नैव जाना-
म्यहमतिथिर्वाऽऽतिथेयो वा ॥

कुत्र गच्छेम

विद्वान् नास्ति क्वचन सुलभः प्रेमसत्याभिरामः
चाटूपास्यः पिशुनविधृतः शासकोऽपि स्वलीनः ।
दूरापास्ताऽपि च सुजनता शक्तिरत्यन्तनम्रा
सत्यं शान्ति मनसि दधतः कुत्र गच्छेम भीताः ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

चलत्येकेन पादेन

यः शयानोऽपि जागर्ति
जाग्रच्छेते च नित्यशः ।
स एव शासकः श्रीमान्
भुनक्ति भुवनत्रयम् ।।।
निमील्य नयनं वामं
दक्षिणेनैव पश्यति ।
तिष्ठन्नेकेन पादेन
गच्छत्यन्येन बुद्धिमान् ।।

कः शमयेत्

एकस्त्वमेव वनराड् यत एव सर्वे
बिभ्यत्यमी गजवराहमृगादयोऽत्र ।
बद्धस्त्वमेव दृढपञ्जरके कथं को
मत्तान् इमान् गजपतीन् शमयेदिहान्यः ।।

तुभ्यमेव

जानीषे नहि जलधे
कथमिवापूर्यस आपगाभिस्त्वम् ।
त्वमिह गभीरीक्रियसे
नातिगभीराभिरेताभिः ।।
एता गिरिवरशृङ्गा-
न्नीचैरायान्ति यान्ति चाधोऽधः ।
दुर्गतिमेतां कृत्स्नां
सहन्त एतास्तुभ्यमेव ।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यन्मनसा न मनुते

पश्यामि तन्न यदनुक्षणमुद्दिदृक्षे
नैवापि तन्मनसि धातुमहं समर्थः ।
गायामि केवलममुष्य गुणाननन्तान्
नानन्ततां तदपि कीर्तयितुं समर्थः ॥
उत्पश्याम्यपि पश्यामि
तदीयां परमां कृपाम् ।
कथं दृग्दृश्यतां याति
नासाविति न बुध्यते ॥

अलघु

लघुनि सञ्चितमस्ति महन्महन्
महति चेह लघूनि बहून्यपि ।
इति महल्लघुनोः परमां कथां
स इह वेत्ति स वेत्ति न चेतरः ॥

वटः

वटः सुहृत् पान्थानां
छायां ददपि तटस्थभावेन ।
प्रदूष्यतेऽयं कैश्चित्
स्वार्थग्रस्तै र्धवलवस्त्रैः ॥
वट हे त्वमसि तटस्थो
महाबोधिरुत्तमोऽसि बुद्धानाम् ।
सर्वानपि मोदयत-
स्स्वयं कृतोऽयमपराधस्ते ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

रे पान्थ

रे पान्थ याहि, पथि यद्यपि कण्टकानि
दीर्घाहदाहपरितापविवर्धकानि ।
सायं स्वकीयगृहमाप्य भवेर्यथा त्वं
तृप्तः स्वकीयपरिवारकथासु लीनः ॥

गङ्गाऽहम्

कूप उपदिशति गङ्गां
"महिमानं स्वं सुशीघ्रमाधेहि ।
त्यज च निजं लघिमान"
मित्याकर्ण्याहसद् गङ्गा ॥
हे कूप यद् वदसि मां
वद परिरवां तां सखे स्वनिकटस्थाम् ।
त्वं जानासि न किञ्चिद्
गङ्गाऽहं नित्यमहिमात्मा ॥

काव्यं तदेव काव्यम्

काव्यं तदेव काव्यं
यत् करुणामयहृदः समायाति ।
अलमेभिः पदजालै—
र्निन्दास्तुतिमात्रसङ्कीर्णैः ॥
श्रोता न चेत् सहृदयो
रम्यं काव्यमप्यकाव्यतां भजति ।
भस्मनि यथा घृताहुति-
रवरे श्रोतरि तथा काव्यम् ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कलहः प्रकृतिः

कलहः "प्रकृतिः शरीरिणां"
"विकृतिः" सौहृद "मुच्यते बुधैः ।
"क्षणमप्यवतिष्ठते" सुहृद्
"यदि जन्तुर्ननु लाभवानसौ ॥"

कृषकजननी

त्वमसि सनातन कठिनो
नगपते तदपि विदार्य ते हृदयम् ।
गङ्गा निर्मलधारा
प्रभवति मृदुला कृषकजननी ॥
दिवश्चुम्बने निरतः
किं त्वं ज्ञास्यसि दशां कृषकमातुः ।
सा तु जनपदाज्जनपद-
मघस्तरामेव जङ्गन्ति ॥

बुभुक्षितो रसराजः

बुभुक्षितो रसराजो
विपुलं स्वर्णं तथाऽऽत्मसात्कुरुते ।
कनकत्वं विपुलत्वं
नश्यत्युभयं क्षणादत्र ॥
पुनः केनचन विधिना
पृथक्कृतमुभयमपि दृश्यतां याति ।
तथैव सज्जनसङ्गात्
खलता नश्यति पुनरुदेति ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नावि स्थितः

नावि स्थितोऽसि, नहि धाव, धृतिं न मुञ्च
तूष्णीं स्थिरः पथिक बन्धुभिरेधि सार्धम् ।
प्रावृण्णदी हसति ते करपादशक्तिं
पारं गमिष्यसि तु नाविकविद्ययैव ॥

महतां लघुपरिक्रमा

परिभ्रमतु विधुस्वीं
साऽपि च परिभ्रमतु दिनकरं व्योम्नि ।
सौरं मण्डलमपि दिवि
महत्तरं किमपि साधु परिचरतु ॥
किन्तु रविर्यदि पृथिवीं
सा च विधुं परिचरेद् विनय भावात् ।
नङ्क्ष्यति लोकः कृत्स्नो
न शोभते लघुपरिक्रमा महताम् ॥

जन्माष्टमी

धर्मावनैकलक्ष्यो
भगवानवतरति ननु सतां त्राता ।
अद्यास्ति जन्मदिवसः
कृष्णस्य सर्वांशपूर्णस्य ॥
द्रक्ष्यति किं स जगत्यां
सतां बुभुक्षामसतामजीर्णं च ।
कः खलु किमपि वदेदपि
दुःसाध्योऽयं महाव्याधिः ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

इतो वा ततो वा

भ्रमर तव विचित्राऽस्ति स्थितिः, सर्व एव
कुसुमतरव एते गुञ्जनं प्रार्थयन्ते ।
इह जिगमिषसि त्वं चेदमी द्रोहभाजो
व्रजसि यदि ततस्त्वं, स्युस्त्विने क्रोधभाजः ॥

अम्भोधरः

अम्भोधरस्त्वमसि मुञ्चसि सर्वमेव
स्वीयं परार्थमनवाप्य कुतोऽपि किञ्चित् ।
उत्पद्यसे त्वमुदधेस्तत एव वायु-
रत्वामुद्वहत्यपि च नाययति स्वगेहम् ॥
नो मूष्यसे त्वमिह पान्थवधूभिरेष
ज्योतिर्ग्रहै रुपरिचासितवर्ण मित्र ।
कृत्यं तथापि न जहासि निजं परार्थ-
मुत्पद्यसे चलसि यासि च लीयसे च ॥

शिवाशिवम्

शिवकृतं शिवसुन्दरमस्ति सज्-
जगदिदं निखिलं, नहि संशयः ।
विदधयि प्रतिकूलमथापि ते
कतिपये रजनीचरबन्धवः ॥
न करुणा मुदिताऽपि न नापि सत्
सततघातपरच्छलनामतिः ।
मनसि पाचि करे च विषं कटु
गुणगणा इम एषु वशंवदाः ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

रथध्वजः

रथाग्रेसरः स्यां ध्वजः कीर्तिमानः
समीरेण खेलन् दिवा स्निह्यमानः ।
दिशा काचिदास्तां गतेः स्यन्दनस्य
मदीया दिशा सैव यत्राधिपो मे ॥

तपस्वी त्वम्

किमपि ततः किमपीतः
किमपि विश्वत आददान रोलम्ब ।
मुञ्चसि सर्वं स्वगृहे
परार्थमेवात्र निःस्वार्थः ॥
गच्छसि पुष्पात् पुष्पं
प्रतिपलमनुयायिभिः समैः सार्धम् ।
श्रमफलमन्यो भुङ्क्ते
नासि विमूढस्तपस्वी त्वम् ॥

मूलमस्मि

मूलमस्मि, न फलं न च पत्रं
हेतुरस्मि परमो न तु कार्यम् ।
यत्क्षणादवनिगर्भनिवास-
स्तत्क्षणान् मम कृतिर्वहिरीक्ष्या ।:
अन्तरेव मम वर्धनशक्तिः
कृत्यमेव मम बाह्यमुदारम् ।
कामयेमुहुरहं जलपानं
वर्धयामि पुनरात्मफलानि ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

परीक्षा

परीक्ष्यतेऽसौ विदधाति कर्म यः
फलं समाप्नोति मुदं ततः परम् ।
न कर्म किञ्चिनहि यत्र च श्रमः
परीक्षया किं च फलेन किं ततः ॥
अलीकवृत्ते न विचारितं त्वया
मृषाफलं नो मधुरं कदाचन ।
फलं न तद्यन्नहि भोक्तुमर्ह्यते
न सा परीक्षा नहि यत्र च श्रमः ॥

याहि सूर्य

याहि याहि सूर्य याहि सायमस्ताचलं
कमलिनी जहातु वा दधातु वा श्रियम् ।
त्वमसि नैव कस्यचिद् वशंवदोऽनुगः
यदभिलषसि तत् कुरुष्व काऽस्ति ते व्यथा ।

रिक्थम्

धेनो किं त्वं कुर्या
रिक्थं वत्सस्य चोरितं कैश्चित् ।
तृणमपि नात्तुं वेत्ति स
दृष्ट्वा स्पृष्ट्वैव सन्तुष्य ॥
उपदिश वत्सं सद्यः
"सारल्यं नैव भुनक्ति, भोजयति ।
विचर विचारय मोहय
तदैव रिक्थं त्वदीयं स्यात्" ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

जयति शिशुः

जयति महारामोऽयं
नियतेर्विश्वाभिधो हरितहरितः ।

जयन्ति तत्र सुमनसो
विविधाकारा विविधवर्णाः ।।

जयन्ति तत्र फलान्यपि
विविधाकाराणि विविधरसवन्ति ।

मिथो विरुद्धान् दधदपि
रसानभेषजमिह न किञ्चित् ।।

कृत्स्नोऽप्ययमारामः
सम्भूय बिभर्ति कल्पना नियतेः ।

तत्कामनानिदेशान्
अनुसरति च सर्वभावेन ।।

शिवस्य मूर्ध्नि कलेव
कलिकाऽत्र विराजते शिरसि तस्य ।

शिरसा वहन्ति सर्ये
स्वयं च तां रसविशेषार्थम् ।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कलिकेयमेव लोके
शिशुनाम्नी सदा सर्वमतिशेते ।
नात्रास्ति काऽपि विकृतिः
संस्कृतिरेवात्र नियतिकृता ॥

हसति क्रन्दति खेलति
वदति च किञ्चिन्निसर्गरमणीयम् ।
न मनः कदापि तृप्यति
सदाऽस्य पिपासति वदनसुधाम् ॥

सोऽयमारामसर्गः
प्रकृतेः काम्यतमः परममधुरः ।
हरति कस्य नहि हृदयं
शुद्धो बुद्धश्च मुक्तश्च ॥

सर्वेषमिष सुहृत्
कृत्स्नो लोकश्च वर्त्ततेऽस्य सुहृत् ।
अनन्यसामान्यसुधां
जयति दधत् कलश एष शिशुः ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

हर हर शम्भो

हे विश्वनाथ सकृपं
क्षमस्व मां, नान्यथा च मन्यस्व ।

अविमुक्तक्षेत्रं तव
नित्यमुपासे मुमुक्षुरहम् ॥

नहि सुलभाऽस्ति वसतिरिह
देवानामपि तपस्विनां वाऽपि ।

तथापि सानुग्रहमिह
जनोऽयमाकारितो भवता ॥

श्रद्धासुमानि शिरसा
वहन्नुपागच्छमिह मुदा भक्त्या ।

तानि वहन्नेव तथा
पुराद् बहि स्ते व्रजामि शुचा ॥

अद्यापि वसति रेषा
सुधियां विदुषां गुणिनां बुधानां च ।

सुरभारती प्रतिगृहं
स्वयमत्र सदैव परिनृत्यति ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

परमपावनी गङ्गा
परमपावनश्च यत्र विश्वेशः ॥

विद्या च यत्र हृद्या
कस्तां नगरीं मुदा जह्यात् ॥

न भयं मम कस्माच्चन
नापि च केनाप्यहं बहिर्गमितः ।

अदृष्टफलमेवैतन्
मुञ्चाम्यविमुक्तमहमार्त्तः ॥

नहि मम मुक्तेश्चिन्ता
तव पुर्यामन्यथाऽमरिष्यमपि ।

जीवन्नेव चिराय
शिवस्वरूपं दिदृक्षेऽहम् ॥

किमपि न तादृक् तत्त्वं
तादृक् स्थानं च न यत्रास्ति भवान् ।

शिवमस्ति विश्वमेव
वन्दे विश्वं शिवं शिवं विश्वम् ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

दृष्टे त्वयि कुत्र कथं
शिव कदाऽप्यमङ्गलोदयावसरः ।
शरदि समुदिते भास्वति
कुतस्तमो वा सिनीवाली ॥
कलाऽपि राकां विकिरति
विधोर्मनोज्ञाऽमृता भवन्मर्घ्नः ।
गरलमपि गलाद् भवतो
वर्षति परितः सुधाधाराः ॥
सुरभारती सुरसरिद्
द्वे अपि गमिते इमे कलुषभावम् ।
दीपतले तम एतद्
हर हर शम्भो महादेव ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

शुद्धिपत्रम्

पृष्ठ संख्या	पङ्क्तिः	अधोलिखितानां स्थाने	अधोलिखितानि पठ्यन्ताम्
६	४	तुप्यति	तुष्यति
६	२१	बिमेमि	बिभेमि
९	१८	प्रणमामि	प्रणमामि
९	२६	प्रणमाभि	प्रणमामि
१३	१०	लभसे	लभसे
१४	३	बेद्भि	वेद्भि
१४	१२	दार्शनिकी	दार्शनिको
२६	४	तश्मिन्	तस्मिन्
२९	२०	तथा	तया
३०	३	पातः	यातः
३०	१२	उद्घाट्यः	उद्घाटय
३१	१	शुमाथुम परित्यागी	शुभाशुभ परित्यागी
३२	१०	तदै	तदैव
३२	१८	तं	तां
३४	११	क्षन्तप्यः	क्षन्तव्यः
३४	१३	भ्तत्रापीश	स्तत्रापीश
४१	१	रण्याणी	रण्यानी
४४	३	निरुणाद्धि	निरुणद्धि
४६	५	नद्यम्	नधम्
४८	२	अधिक्षिपासि	अधिक्षिपसि
५२	२२	अन्धलज्जा	अन्धलज्जाः
५३	१४	सनरसतां	समरसतां
५६	४	पृद्ध	वृद्ध
५८	१८	नृणां	नृणां
६०	६	न जनिष्यति	नोदेष्यति
६२	११	धूलिमाक्	धूलिभाक्
६३	११	वैलक्षण्यन्	वैलक्षण्यम्

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

६३	१९	तच्	तत्
६५	१	न त्दं त्यवक्ष्मसि	न त्वं त्यक्ष्यसि
६६	५	शिबः	शिवः
६६	७	विमुः	विभृः
६६	१५	फलवाश्च	फलवाँश्च
६६	२३	ऽमूर्त्ते	(२४ श्यां पङ्क्तौ प्रारम्भे)
६७	१३	वीभत्सो	बीभत्सो
६७	१५	बासः	वासः
६७	२३	चिन्त	चिन्ता
६९	१	क्षुरक्ष्य	क्षुरस्य
६९	५	सर्नतः	सर्वतः
६९	१०	क्वासो	क्वासौ
७०	६	सदाश्रयम	सदाश्रय
७०	१३	परं	वरं
७०	१५	धन्यस्त्वं	धन्यस्त्नं
७१	५	प्रदर्शयस्वेव;	प्रदर्शयस्येव
७१	८	नयनविहीनाः	नयनविहीना
७१	१४	स्मरारिम	स्मरारिम्
७२	१	फिविधं स्वरूपं	त्रिविधं स्वरूपम्
७४	१२	ततैव	तदैव
७४	१५	रे से	रे रे
७४	१६	सहब्रशो	सहस्रशो
७४	१७	कलकाली	कलकाकली
७४	२२	ममाल्ति	ममास्ति
७८	२१	देदनानां	वेदनानां
८०	३	(तृतीया पङ्क्तिः)	(द्वितीया पङ्क्तिः)
८०	७	आकाशोहं	आकाशोऽहं
८१	४	रसालतरु	रसालतरू
८२	२६	मृत्यः	मृत्युः
८३	२६	कामदुघाँ	कामदुघा

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

८७	९	भ्यञ्जसा	म्यञ्जसा
९०	८	तुरत्वकपि	तुरत्वमपि
९१	८	जीवव-	जीवन-
९१	९३	शन्यं	शून्यं
९३	१	मौमीयो-	भौमीयो-
९३	४	किञ्जि-	किञ्चि-
९५	२	असौ	आसै
९५	३	यह्यम्	मह्यम्
९५	११	व्यक्त्मा	त्यक्त्वा,
९५	१३	परिश्वा	परिखां
९६	१२	-धातेध्य	धातेभ्य
९६	२१	सा	सदा
१०१	१८	-वश्नक	-वश्यक
१०३	२१	भूपै	भूपैः
१०५	२४	मदी-	मदो-
१०६	३	पुष्णात्ति	पुष्णाति
१०६	१६	-वि-	वहि-
१०९	६	सघुता-	लघुता
११०	२६	गुंढैः	गूंढैः
११३	४	सुसनगः	सुमनसः
११३	७	-रासनीयक-	-रामणीयक-
११४	८	स्पय्टः	स्पष्टः
११४	१५	रथं	रयं
११५	६	मतियन्	मतिमन्
११५	१३	गृहिशः	गृहिणः
११५	२४	भुयि	भुवि
११७	७	संवृवत्तम्	संवृत्तम्
११७	२५	पिपरीत-	विपरीत-
११८	३	-तामु-	-तानु-
११९	१	भुव	भुवः
११९	१२	हृदरयतः	हृदयतः
१२१	४	कुरुपे	कुरुषे
१२३	२	सनोर-	समीर-

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

१२३	३	तृशाय	तृणाय
१२३	२१	-वृश्या-	-दृश्या-
१२३	२२	तदिदर-	तदितर-
१२४	१०	-पङ्क्त्य	पङ्क्तय-
१२४	२१	यस्ग	यस्य
१२५	३	-न्यु-	-त्यु
१२५	९	वर्षंति	वर्षति
१२६	७	चात्युदमम्	चाप्युदयम्
१२६	१२	षथं	पथम्
१२६	१७	भावैः	-भावै-
१३१	४	द्यम्नों	धर्मो
१३२	१६	छिन्दन्तिति	छिन्दन्ति
१३३	११	स्वाथः	स्वार्थः
१३३	१६	भवि	भुवि
१३३	२३	विवादैर्वा	विवादैर्वा
१३५	२१	सभवति	प्रभवति
१३५	२१	—तसश्च	—सतश्च
१३६	२	गदं	गवं
१३७	११	—गेहरस्य	गेहस्य
१३९	१२	गादं	गाढं
१३९	१६	स्तुति	स्तुतिः
१४०	३	पृष्टे	पृष्ठे
१४०	१३	पड्मावती	पद्मावती
१४०	१६	समेषान्	समेषाम्
१४०	१७	भपता-	भवता-
१४०	१९	-शास्ति-	-शस्ति
१४३	२१	लघुर्द्विजोऽयं	(विंश्यांपङ्क्तावेव
१४३	२	कथःमपि	कथमपि
१४३	४	-ङ्सिां	-हिंसां
१४८	४	ऊष्माणमाह्व-यसि मूढ	ऊष्माणमावाहयसि
१५७	१८	विदधयि	विदधति
१५७	२२	पाचि	वाचि
१५९	४	किञ्चिनहि	किञ्चिन् नहि

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

(विरतसेवः) संयुक्तशिक्षामन्त्रयिता प्रवर्त्तकनिदेशको राष्ट्रियसंस्कृतसंस्थानस्य, केन्द्रीय संस्कृत विद्यापीठस्य च, कुलपतिः व दरभंगा-सम्पूर्णानन्द-संस्कृतविश्वविद्यालययोः, आचार्यः संयुक्तराज्य-न्यूयार्क नगरकोल विद्यालये । प्रथमपञ्चमविश्वसंस्कृतसम्- जनसचिवः । इतः पूर्वं नालन्दामहाविद्याल विश्वविद्यालयसेवायां च लंगटसिंहमहाविद्या हिन्दीविभागयोरध्यापकः, विहारप्रशासन सेव

कृष्टवब्दानुसारिणी जन्मतिथिः २०.३.१९

राष्ट्रहुतात्मनः कामेश्वरप्रसादशर्मणः सू स्वतन्त्रस्य वेदमूर्त्तेर्लोकमान्यब्रह्मचर्याश्रमकुलपते दत्तशर्मणः शिष्यः, कैलिफोर्नियाविश्वविद्या भारतीमुपासीनाद् द्राविडभारोपीयभाषातत्त्ववि मुरे बार्न्सन् एमेनिउमहोदयादधिगतभाषासा दर्शनः (फुलब्राइट योजनायाम्) ।

गुरोराज्ञया बाल्य एवायमरीरचत् संस्व अगस्तक्रान्तेः पूर्वं रचिताः 'मा भैषीः' ' करुणाकर' 'यानं कालस्य' इत्याद्या अनेका गताः । प्रथमं प्रकाशिता रचना 'तुलसी (वैशाली, १९४३)' 'मदालसा काव्यं (प्र प्रकाशितम् (१९५५) । अनेकाः कविताः संस दिपत्रिकासु प्रकाशिताः ।

"एलिमेंट्स् ऑव पोएट्री इन् द महा इति शीर्षके ग्रन्थे (बर्क्ले १९६४) मौखिक दिशा, विशेषेण महाभारतीयानामुपमानानां विश्लेषणात्मकमध्ययनं कृतम् । वैद्यश्रीभगवान्द चरकसंहिताया आंग्लानुवाद आयुर्वेदर्द सारभूतमांग्लव्याख्यानं सम्पादितम् (वाराणसी वियोगीहरिसम्पादिते 'हमारी परम्परा' इति रीण राजधर्मस्य स्वरूपं हिन्दीभाषाया निरूपित

अनेके शोधविषयकाः/लोकप्रियाः प्रबन्धा ताः / पठिताः / श्राविताः /

मनसा, वचसा, कर्मणा संस्कृतसेवकः ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.